वीर सेवा मन्दिर

दिल्ली

★

क्रम संख्या ४६५

काल नं० २३२.१ हेमचं

खण्ड

समालोचन के लीये

आचार्यश्रीमद्विजयकमलसूरीश्वरजीजैनग्रन्थमालाया-
स्तृतीयो मणिः [ ३ ]

कलिकालसर्वज्ञभगवच्छ्रीहेमचन्द्राचार्यविनिर्मितः,
जयवीरगणिविलिखितावचूरिसमलङ्कृतः—

# श्री हैमधातुपाठः ।

[ टिप्पणपरिशिष्टादिभिः समलङ्कृतः ]

सपादकः सशोधकश्च—
जैनरत्नव्याख्यानवाचस्पतिकविकुलकिरीटसूरिसार्व-
भौमजैनाचार्यश्रीमद्विजयलब्धिसूरीश्वरक्रमकुमुद-
चञ्चरीको—

विक्रमविजयो मुनिः ।

प्रकाशक.—
पत्तननगरस्थश्रीकेसरबाइज्ञानमन्दिरसंस्थापकः श्रेष्ठिराट्
मणिलालात्मज पूनमचन्द्र संघवी ।
वीर सं. २४६४ विक्रम सं. १९९६ आत्म सं. ४८
मूल्यमाणकाष्टकम्

वीर सेवा मन्दिर पुस्तकालय
जनरल नं

प्राप्तिस्थानम्—
**श्री केसरबाइ ज्ञानमन्दिर**
नगीनभाइ हॉल
पाटण ( उ. गुजरात )

卐

मुद्रकः—
शाह गुलाबचंद लल्लुभाइ
श्री महोदय प्रेस—भावनगर.

न्यायाम्भोनिधि जैनाचार्य श्रीमद्विजयानन्दसूरीश्वरजी
( आत्मारामजी ) महाराजना पट्टधर.



निस्स्पृह चूडामणि सद्धर्मसंरक्षक जैनाचार्य
**श्रीमद्विजयकमलसूरीश्वरजी महाराज.**

श्री महोदय प्री. प्रेस-भावनगर.

# शब्दोद्गमः

इह खलु सुविदितमेवैतदवनितले भारतीयानां सर्वेषामपश्चिमविपश्चिता निखिलवाङ्मयाधारशब्दोत्पत्तिहेतुकधातुज्ञानमन्तरेण गीर्वाणप्रियायाः संस्कृतवाण्याः सम्यगवबोधो भावार्थसार्थे सपादनाभिलाषुकैर्न समुपलभ्यते अत एवानवबोधवासितान्तःकरणाना बुबोधयिषया धातुविज्ञानविज्ञचूडामणिभिर्धातुसंग्रहणरसिकरचनारचितस्वीयग्रन्थेषु यौगिकरौढिकादिव्यवहारव्यवहृतनानानामसमुत्पत्तिस्थानभूतधातुरत्नाना सञ्चयोऽकृत ।

किञ्च वाग्जलमलदूरीकरणद्वारा व्याकरण हि परमप्रयोजनोपयोगि, तथा हि व्याकरणान्नामसिद्धिः, नामसिद्धेः पदसिद्धिः, पदसिद्धेः तत्त्वज्ञानं ततः कैवल्यावाप्तिः, एवं प्रकारेण शब्दशास्त्रं मोक्षहेतुभूतं सिद्धम् । तथा चोक्त 'व्याकरणात्पदसिद्धिः पदसिद्धेरर्थनिर्णयः, भवत्यर्थात्तत्त्वज्ञान तत्त्वज्ञानात्पर श्रेयः' इति मन्वाने. प्रतिभामण्डनमण्डितपण्डितप्रकाण्डैरप्रमिता व्याकरणविषया ग्रन्था जग्रन्थिरे ।

तथा ये ये शब्दशास्त्रस्य गुणास्ते धात्वविनाभाविनः, यथा च शास्त्रेषु व्याकरणस्य निःश्रेयसप्रयुक्तमुत्कृष्टत्वं दरीदृश्यते तथा तदन्तर्गतत्वाद् धातोरपि—तथोक्तं भगवद्भिः दशमाङ्गे द्वितीय संवरद्वारे चतुर्विंशतितमे सूत्रे "अहकेरिसयं पुणाइ सच्चं तु

भासिअत्थं जंतं दव्वेहिं पज्जवेहिय गुणेहिं कम्मेहिं बहुविहेहिं मि-प्पेहिं आगमेहिं य नामक्खायनिवायउवसग्गतद्धिअसमाससंधिपदहेतुजोगियउणाइकिरियाविहाणधातुसरविभत्तिवण्ण जुत्तं तिकल्लं दशविहम्मि "त्यादि एवं च मौलो धातुः व्याकरणस्य तथा च श्रुतिः 'नाम च धातुजमाह'

तत्र धातवः के ? इति प्रश्ने प्रत्युत्तरोऽयं धातुत्वप्रकारकप्रमाविशेष्या ये ते धातव इति, यथा भ्वादयः, धातुत्वन्तु क्रियात्वावच्छिन्नबोधजनकतावच्छेदकतया कॢप्तो धर्मविशेषः, तथा चाहुः 'क्रियार्थो धातु' रिति तथा धातुरिति संज्ञा भ्वादीनामन्वर्थैव न केवलं हि सज्ञादिवत् सांकेतिता, महासंज्ञाकरणवैयर्थ्यापत्तेः, नापि केवलं रूढा, अशोकवनिकान्यायावलम्बनापत्तेः किन्तु पङ्कजादिवद्योगरूढा सञ्ज्ञैषा विज्ञेया, अस्ति हि भ्वादीनां धातूनां धारकत्वं पोषकत्वं चान्यासाधारणम् । नर्ते धातूनां कस्यापि वाङ्मयाधारकत्वं पोषकत्वं च सम्भवतीति । ततश्च परम निःश्रेयसनिःश्रेणिकामारुरुक्षुभिर्वाणीशुद्धये, परमशास्त्रनिगूढ मर्मपरिच्छित्तये च द्वितीयमहाव्रतपरिपालनोपयोगितयाऽवश्यम्भावेन विज्ञेयमेव धातुप्रधानं शास्त्रम् । ते च धातवो हैमव्याकरणादिनिबन्धेषु यथाप्रयोगसिद्धि निबद्धा एव, परं तदियत्ता ज्ञानं तत्प्रधानप्रबन्धमन्तरा न सुगममिति मन्वानैस्तैस्तैरेवाचार्यैः पृथगपि हैमधातुपारायणादयो ग्रन्थाः प्रकाशिताः, तेषामपि मतान्तरप्रदर्शनादिविषयबाहुल्यतया लाघवैषिणा ततोऽपि लघुभूतमन्वेषयता मया व्यलोकि ग्रन्थोऽयं स्तम्भपुरीजैनशालाभाण्डागारे।

तदा पञ्चवादान्तर्गतपञ्चलक्षण्या अध्ययनं कुर्वतोऽपि मेऽन्तःकरणं स्वकीयापूर्वगुणव्रजैर्ग्रन्थोऽयमहार्षीत, यद्यपि ग्रन्थस्यास्य जीर्णत्वमसाधारणं दृष्टं बहवः पाठास्त्रुटिताश्चाक्षराणामुपलब्धिर्दुरापाऽसीत्, अतः परमनिश्शंकतया पाठनिर्णयार्थं प्रत्यन्तरोपलिप्सा मनसि जागर्त्ति स्म तदुपशमनाय भाण्डागारेषु कृतान्वेषणः 'पाटडी' ग्रामीयपुस्तकालयाद् द्वैतीयिकीं प्रतिमुपलब्धवान्, आधारभूतेनामुना प्रतिद्वयेन समुपजातपाठनिर्णयः-अस्योपयोगित्वं च मन्यमानो महाजननयनगोचरीकरणाय समारब्धप्रयत्नोऽभूवम्, तत्रमदीयलघिष्ठगुरुभ्राता श्रीनेमविजयो मूलप्रतेः प्रतिकृतिकरणेन साहाय्य दत्तवान्, उच्चावचोच्चग्रन्थगुम्फनाधरीकृतसुरगुरुभिराह॑त कुमारपालभूपालप्राप्तकलिकालसर्वज्ञबिरुदैः, चेतस्विचेतश्चमत्कारिचमत्कारन्यक्कृतमिद्धयोगिभिर्युगप्रधानैः श्री हेमचन्द्राचार्यवर्यैर्विरचितं हैमधातुपारायणं तथा श्रीमद्गुणरत्नसूरीश्वरविनिर्मितक्रियारत्नसमुच्चयमाधारतयाऽगृह्णम्।

अस्या अपि क्लिष्टस्थलसुस्पष्टीकरणाय तत्र तत्र मया टिप्पणी सदृब्धा ' नामूलं लिख्यते किञ्चिन्नयच्यतेऽपेक्षितं न चे 'ति न्याय मनुसरता। तत्राप्यनुक्तानां कण्ड्वादिधातूनामवबोधाय ग्रन्थान्तरान्वेषणं जिज्ञासूनां न स्यादिति कविकल्पद्रुमतो न्यायमञ्जीरीतो धातून्, लघुवृत्तिसकाशाच्च किञ्चित्संशोध्य वृत्तगणफलानि च संगृह्य परिशिष्टतयाऽन्ते तानि मयोपस्थापितानि, अस्या अवचूर्याः प्रणेतारः कस्मिन्ननेहसि बभूवुः, कं वा भूवलयं पावयाञ्चक्रुरित्याद्यैतिह्यकथाविषयकप्रबलप्रमाणोपलम्भवैधुर्येण नात्र तच्चर्चा समुपस्थाप्यते

त एवास्याः कर्तार इत्यपि निर्णेतुं न पार्यते ग्रन्थान्ते केवलं जयवीरगणिनाऽलेखि इत्येतावन्मात्रस्यैव दर्शनात् , तत्कृतेतरग्रन्थानामश्रूयमाणत्वाच्च, एवं चेत्कर्तारस्तदा ग्रन्थान्तोल्लिख्यमानवर्षेण पञ्चदशशताब्द्या अन्ते षोडशशताब्द्या आदौ च तत्सत्तासमय इति सुस्पष्ट एव ।

शुभमेतत्संपादनकार्यं परमकृपालुगुरुदेवकविकुलकिरीटजैनरत्नव्याख्यानवाचस्पतिश्रीमदाचार्यविजयलब्धिसूरीश्वराणामनुकम्पयैवाकारि मयेति तत्रभवतां तेषां भवार्णवसन्तरणतरणिकल्पपादारविन्दयुगलं भूयोभूयोऽभिवादये तत्कृतोपकरणस्मरणामृतमास्वादये च ।

आशासे च सम्पादनकर्मण्यस्मिन्-छाद्मस्थ्यप्रयुक्ते दोषे समुज्जृम्भमाणेऽपि स्वाभाविकत्वं मन्यमानैर्गुणदोषविचारणाचतुरैर्निष्पक्षपातिभिर्ग्रन्थमिममवलोक्य मदीयप्रयाससाफल्यं क्रियतामिति ।

फलवर्धिनगरे
भाद्रपदसितचतुर्थ्याम् गुरुवासरे
१९९६, ता. ६-९-४०.

विक्रमविजयः ।

# विषयानुक्रमणिका


| | | | |
|---|---|---|---|
| भ्वादिगणे | पृष्ठ | कुटादिधातवः | ७४ |
| परस्मैपादिधातवः | १ | आत्मनेपदिधातवः | ७६ |
| आत्मनेपदिधातवः | २६ | रुधादिगणे | |
| उभयपदिधातवः | ३९ | उभयपदिधातवः | ७७ |
| द्युतादिगणः | ४४ | परस्मैपदिधातवः | ७८ |
| ज्वलादिधातवः | ४६ | आत्मनेपदिधातवः | ७९ |
| यजादिधातवः | ४८ | तनादिगणे | |
| घटादिधातवः | ४९ | उभयपदिधातवः | ८० |
| अदादिगणे | | आत्मनेपदिधातवः | ८० |
| परस्मैपदिधातवः | ५३ | क्र्यादिगणे | |
| आत्मनेपदिधातवः | ५६ | उभयपदिधातवः | ८१ |
| उभयपदिधातवः | ५७ | प्वादिधातवः | ८२ |
| ह्वादिधातवः | ५७ | परस्मैपदिधातवः | ८३ |
| दिवादिगणे | | आत्मनेभाषा | ८३ |
| परस्मैपदिधातवः | ५९ | चुरादिगणे | |
| पुषादिधातवः | ६१ | परस्मैपदिधातवः | ८५ |
| आत्मनेपदिधातवः | ६३ | आत्मनेपदिधातवः | ९७ |
| सूयत्यादिधातवः | ६३ | अदन्तधातव. | १०१ |
| उभयपदिधातवः | ६६ | आत्मनेपदिधातवः | १०६ |
| स्वादिगणे | | युजादिधातवः | १०७ |
| उभयपदिधातवः | ६७ | परिशिष्टे | |
| परस्मैपदिधातवः | ६८ | धात्वनुबन्धफलानि | १ |
| आत्मनेपदिधातवः | ६९ | कण्ड्वादिधातवः | ७ |
| तुदादिगणे | | सौत्रिकाधातवः | १२ |
| परस्मैपदिधातवः | ७० | लौकिकाधातवः | २० |
| मुचादिधातवः | ७० | गणफलानि | २२ |

# शुद्धिपत्रकम्

| अशुद्धि | शुद्धि | पृ. | पं | अशुद्धि | शुद्धि | पृ | प |
|---|---|---|---|---|---|---|---|
| शद्वोप | शब्दोप | ६ | ५ | विध्वं | विध्वं | २६ | १६ |
| भिभव | पिभव | ९ | १५ | णगे | गणे | ३२ | १ |
| सिध्यन्ति | सिद्धयन्ति | १० | १९ | सत्त्व | स्वत्त्व | ३२ | १९ |
| स्फूर्गणं | स्फूर्णं | ११ | १५ | निवृति | निर्वृत्ति | ३२ | १९ |
| स्फूरर्णं | स्फूर्णं | ,, | ,, | मूर्ध्दन्या | मूर्द्धन्या | ३७ | ९ |
| वलने | बलने | ,, | १९ | ओष्ठयादि | औष्ठयादि | ३७ | १६ |
| उत्रासे | उत्रासे | १२ | १५ | णिदृग् | णिदृग् | ४१ | १० |
| देशे | देश | १४ | १४ | णेदृग् | णेदृग् | ४१ | ११ |
| पुण्डरिक | पुण्डरीक | १४ | २० | श्रधूड् | श्रधूड् | ४५ | ८ |
| वृंहित | बृंहितं | १६ | २ | श्रध्रूग् | श्रधूग् | ४१ | १४ |
| हेषितं | हृषितं | १६ | ३ | उपलम्भ्ने | उपलम्भने | ४२ | १८ |
| हृस्वा | ह्रस्वा | १६ | ६ | पल्ॡ | पल्ॡ | ४६ | ६ |
| हृस्वो | ह्रस्वो | १६ | ७ | मकर्म | सकर्मा | ४७ | २ |
| ,, | ,, | १६ | ९ | ओष्ठ्या | औष्ठ्या | ४७ | ७ |
| धातु | धातू | १६ | १६ | ववधीयन्त | वधीयते | ४७ | १६ |
| प्रति | प्रती | १७ | २ | घटिष | घटिष् | ४९ | ७ |
| चेत् | चे | १८ | १५ | प्रसवे | प्रसव इ | ५० | ११ |
| शब्दे· | शब्दे | १९ | ६ | कलथ | क्रथ | ५१ | १० |
| मन्दायाम् | मन्दायाच | १९ | १२ | प्रयुङ्कत | प्रयुङ्क्त | ५१ | १३ |
| अनिट् | सृप्लृंअनिटौ | १९ | १४ | मथयो. | मथनयो: | ५२ | १० |
| पादावक्षेपे | पादविक्षेपे | २१ | ३ | चूरादौ | चुरादौ | ५२ | १५ |
| ईर्ष्याथा | ईर्ष्यार्था: | २१ | ११ | घटादि | घेटादि | ५२ | १६ |
| सेलृ | सेलृ | २२ | २० | मीहा | मिहा | ५२ | १८ |
| दृशृ | दृशृं | २३ | १५ | अयूत | अयुत | ५४ | १९ |
| इषद्धसने | ईषद्धसने | २६ | ६ | लुक् | लुप् | ५५ | १० |

| अशुद्धि | शुद्धि | पृ. | पं. |
|---|---|---|---|
| जीगिषा | जिगीषा | ५९ | १० |
| दुर्गन्धयः | दुर्गन्धः | ५९ | १५ |
| चूरादे | चुरादे | ५९ | १७ |
| हुतिः | हूतिः | ६१ | २ |
| नन्दि | नन्दी | ६२ | १८ |
| पर्यन्तन्तम् | पर्यन्तम् | ६३ | ८ |
| दिवाद्य | दिवाद्य | ६३ | १७ |
| ईङ्क्‌ | ईङ्ख्‌ | ६४ | ९ |
| शश्नोतेः | शक्नोतेः | ६६ | १३ |
| रुवादि | खादि | ६८ | १ |
| नान्त. | शान्तः | ६९ | १६ |
| अष्टक | अष्टक. | ७० | १६ |
| ऋषत् | ॠषैत् | ७४ | ५ |
| रिटवि | रिङ्वि | ७८ | १० |
| रुधादि | रुधादी | ७९ | २० |
| उपान्तस्य | उपान्त्यस्य | ८० | १७ |
| गता | गतो | ८१ | १३ |
| वागू | वाचि | ८६ | ६ |
| स्फुटणे | स्फूटण इ | ८७ | ५ |
| षिडुण | पिडुण् | ८७ | १२ |
| कृतण् | कृतण् | ८७ | १७ |
| बुस | ब्रस | ९० | १६ |
| ष्लिहण् | ष्णिहण् | ९० | १७ |
| कान्तः | कान्तौ | ९६ | १८ |
| धान्तौ | धान्तौ | ९६ | १९ |
| भाषा | भामा | ९७ | १४ |
| कार्य | कार्थ | ९७ | २० |
| घर्षयते | धर्षयते | ९९ | ७ |
| हृस्वा | ह्रस्वा | १०२ | ११ |
| त्वर्थ | त्वर्थोऽ | १०२ | १५ |
| अनेक | अनेकस्वर | १०३ | ७ |
| धान्तौ | धान्तौ | १०५ | ४ |
| विच्छेद.उदी | विच्छेदोदी | १०५ | ५ |
| श्वत्वारः | पञ्च | १०५ | १४ |
| क्षेत्रसबुस | क्षेत्रंसबुस | १०५ | १६ |
| पल्ल्यूले | पल्यूले | १०५ | १६ |
| उदन्तः | ऊदन्तः | १०७ | ११ |
| उदन्त | ऊदन्त | १०८ | ४ |
| वृदण् | छृदण् | १०८ | १४ |
| शुद्धो | शुद्धौ | १०८ | १५ |
| लम्भने | लम्भने | १०८ | १९ |
| इरण् | ईरण् | १०९ | ३ |
| छादयति | छदयति | १०९ | १९ |
| लम्भन | लम्भनं | ११० | ६ |
| स्तभ्नो | स्तभ्नोति | १२ | ७ |
| हैम | हैम | १४ | १ |
| भिष | भिषो | १८ | १८ |
| हृस्वो | ह्रस्वो | २२ | ६ |
| ,, | ,, | २२ | ९ |

ॐ अर्हं नमः ।

# श्रीहैमधातुपाठः ।

[ अवचूरिसहितः ]

## अथ परस्मैपदिनो धातवः

### १. भूं सत्तायाम् ।

अवचूरिः—नमः श्रीशारदायै । इह पूर्वाचार्यप्रसिद्धाः सुखग्रहणस्मरणकार्यसंसिद्धये विशिष्टानुबन्धसम्बन्धक्रमाः स-

१. अभूत् भूत इत्यादौ प्रयोगित्वदर्शनादूकारस्याप्रयोगीदि(१ । १ । ३७) तीत्संज्ञा न भवति । एवमन्यत्रापि । भू इति च निरनुस्वारस्य पाठादेकस्वरादनुस्वारेतः (४ । ४ । ५६) इत्यनिट् न भवति । सेट्त्वानिट्त्वे च यद्यपि स्ताद्यशितोऽत्रोणादेरिटि ( ४ । ४ । ३२ )ति प्रत्ययस्यादौ विधानात् प्रत्ययस्यैव तथाप्युपचारेण धातोरपि । भू धातोः सत्तारूपार्थ एव आदौ किमर्थः परिगृहीतो धातूनामनेकार्थत्वात् ? सत्तारूपस्यैवार्थस्याऽङ्गीकारे तु "सत्तायां मङ्गले वृद्धौ, निवासे व्याप्तिसम्पदोः । अभिप्राये च शक्तौ च, प्रादुर्भावे गतौ च भूः ॥" इत्यादीनि वचनानि न सङ्गच्छेरन् , इति चेन्न सत्ताया महाव्यापकत्वात् सर्वेषु धात्वर्थेष्वनुवृत्तेः ॥

हार्थेन प्रकृतयः प्रस्तूयन्ते । तत्र यद्यपि नामधातुपदभेदात् राजा, जयति, पूर्वाह्णेतरामित्यादौ त्रेधा प्रकृतिस्तथापि नामपदयोर्धातुमूलत्वाद् धातुप्रकृतिरेवैका प्रधाना । सापि द्वेधा शुद्धा प्रत्ययान्ता च । शुद्धा भू इत्यादि, प्रत्ययान्ता गोपाय, कामीत्यादि । एषापि शुद्धमूलैवेति, शुद्धैवोदाह्रियते । भू इति–अविभँक्तिको निर्देशस्सान्तरान्तशङ्कानिरासार्थः, एवं सर्वत्र । वर्णसमाम्नायक्रमेण स्वरान्तव्यञ्जनान्तधातुपाठप्रतिज्ञानात्

---

१. क्रियार्थो धातुः( ३ । ३ । ३ ),इत्यत्र क्रियात्वमेकफलावच्छेदेन प्रवृत्तस्य पूर्वापरीभूतावयवकसंकलनात्मकैकबुद्धिविषयीकृतव्यापारसमूहत्वं तथा चोक्तं–" यावत् सिद्धमसिद्धं वा, साध्यत्वेनाभिधीयते । आश्रितक्रमरूपत्वात्, क्रियेति व्यपदिश्यते ॥ गुणभूतैरवयवैः समूहः क्रमजन्मनाम् । बुद्ध्या प्रकल्पितो भेदः क्रियेति व्यपदिश्यते ॥ " अत एवारब्धक्रियातस्तत्समाप्तिपर्यन्तं पचति–इत्येव प्रयोगः ।

२. भू इति वानुकरणं तत्र पक्षद्वयम्–अनुकरणमनुकार्याद् भिन्नम्, अनुकरणमनुकार्यादभिन्नञ्चेति । अस्मन्मते त्वनुकार्यानुकरणयोः कथञ्चिद् भेदाभेदः । यदानुकार्यानुकरणयोरभेदाश्रयणं तदानुकार्यनिरूपितशक्त्यैवानुकरणेनापि बोधादर्थवत्त्वाभावान्नामसंज्ञाया अभावेन न भू इत्यस्मात् विभक्तेरुत्पत्तिर्यदा तु भेदाश्रयणं तदानुकरणेन बोधाय शक्तेः स्वीकार्यत्वादर्थवत्त्वेन नामसंज्ञायां विभक्तेरुत्पत्तिर्भवति परं त्वत्र शंकाव्युदासाय निर्विभक्तिको निर्देशः कृत इति भावः ।

पां पान इत्यादेः पूर्वं निर्देशे प्राप्ते वृद्धसमयानुवर्तनार्थं मङ्गलार्थं चास्यादौ[1] पाठः, एवमदादिगणेष्वपि कारणं ज्ञेयम् ।

भू इत्येषा प्रकृतिः सत्तायां वर्त्तते । सतो भावः सत्ता, अस्तित्वं द्रव्यधर्मो धात्वर्थसामान्यमिति यावत् । ननु भुव-स्सत्तावाचित्वे धातुत्वमनुपपन्नं क्रियार्थो हि धातुः क्रिया च स्पन्दरूपा, सत्ता तु द्रव्यादिषु सत्सदित्यनुवृत्तप्रत्यया-भिन्नलिङ्गाऽस्पन्दरूपा[2], न, यथा जानाति श्वेतत इत्या-दीनां ज्ञानवर्णादयो द्रव्यगुणा अस्पन्दात्मका अप्याख्यात-प्रकृतिवाच्यास्सन्तः क्रियाव्यपदेशमर्हन्ति तथा सत्तापि द्रव्य-धर्मो धातुवाच्यतामापद्यमाना क्रियाव्यपदेशं लप्स्यते । अर्था-

१. अशोकवनिकान्यायेन वादौ पाठः । २. 'सा नित्या सा महानात्मा, तामाहुस्त्वतलादयः । प्राप्तक्रमाविशेषेषु, क्रिया सैवा-भिधीयते ॥ १ ॥ तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते । अपि च धात्वर्थः केवलश्शुद्धो भाव इत्यभिधीयते ' इति प्रमा-णम् । ३ द्रव्यनिष्ठधर्मविशेषरूपेति यावत् ॥

४. आदिना स्मरति श्रद्धत्ते संयुज्यते समवेति वियुज्यते नश्यति इत्यादीनां स्मरण–श्रद्धान–संयोग–समवाय–वियोग–विनाशादयो द्रव्यगुणा अपरिस्पन्दात्मका अपि आख्यात प्रकृति-वाच्यत्वात् क्रियाव्यपदेश्या ग्राह्याः । ५. मणिमुकुरकृपाणादि-ज्ञापकवैचित्र्यादेकरूपस्यापि मुखादेर्नानात्वोपलब्धिवद्धातुवाच्या सत्तापि क्रियात्वमास्कन्दति ।

न्तराण्यप्यनयोपलक्ष्यन्ते । यदाहुः ' निपाताश्चोपसर्गाश्च, धातवश्चेति ते त्रयः । अनेकार्थास्स्मृतास्सर्वे, पाठस्त्वेषां निदर्शनम् ' ॥ १ ॥ तथा च भूरयं क्वचिदस्त्यर्थे वर्तते यथा बहूनि धनान्यस्य भवन्ति सन्तीत्यर्थः । क्वाप्यभूतप्रादुर्भावे, यथा वचाक्षीरभोजिन्याः श्रुतधरः पुत्रो भवति, जायत इत्यर्थः । क्वचिदभूततद्भावाख्ये सम्पत्त्यर्थे, यथा–अशुक्लः शुक्लो भवति, सम्पद्यत इत्यर्थः । उपसर्गवशाच्चानेकार्थो धातोः प्रकाश्यते, यथा प्रभवतीति, स्वाम्यर्थः [ सामर्थ्यमर्थः ] प्रथमत उपलम्भश्च । पराभवति परिभवत्यभिवतीति तिरस्कारः । सम्भवतीति जन्मार्थः, प्रमाणानतिरेकेण धारणञ्च । अनुभवतीति संवेदनम्, विभवतीति व्याप्तिः, आभवतीति भागा गतिः, उद्भवतीत्युद्भेदः, प्रतिभवतीति लग्नकत्वम्[२], अथवाऽर्थान्तरेष्वपि क्रियासामान्यरूपा सत्तानुवर्तत एवेति सत्ताया एवोपादानं कृतम् । सत्ताव्यतिरेकेणार्थान्तराणि खरविषाणायमानानि स्युः । षड् भावविकारा इति वचनाच्च भावः सत्ता सामान्यरूपा क्रियेत्यवसीयते । यदाहुः– ' जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, विनश्यतीति षड् भावविकारा ' इति । अपि च सर्वेऽपि धातवस्तेन तेनोपाधिना सत्तामेवावच्छिद्यावच्छिद्य विषयीकुर्वन्तीति सा

१. यदाहुः—' उपसर्गेण धात्वर्थो बलादन्यत्र नीयते । प्रहाराहारसंहारविहारपरिहारवत् ॥ ' इति । २ लग्नकः साक्षी ।

क्रिया सामान्यमित्युच्यते, तथा च ' क्रियार्थो धातु ( ३। ३। ३ ) रिति भुवो धातुत्वम् ॥ १ ॥

२–७. आदन्ताः–पां पाने, घ्रां गन्धोपादाने, ध्मां शब्दाग्निसंयोगयोः, ष्ठां गतिनिवृत्तौ, म्नां अभ्यासे, दांम्ँ दाने ॥

अ०–अथाऽऽदन्ताष्षट् अनिटश्च । आकारश्च नेत् प्रयोगित्वात्, अनुस्वारेत्त्वान्नेट्, एवमुत्तरेष्वपि । अभ्यासः पारम्पर्येण वृत्तिः, मकार इदप्रयोगित्वात् ॥

८–११ इदन्ताः–जिं ञिं अभिभवे, क्षिं क्षये, इं [गतौ] ॥

अ०—इतः परमिदन्ताश्चत्वारोऽनुस्वारेतः ॥

१२–१७ उदन्ता–दुं द्रुं शुं श्रुं गतौ, ध्रुं स्थैर्ये च, सुं प्रसवैश्वर्ययोः ।

---

१. विशिष्टानुबन्धाभावाद् ध्वाक्षुयावत्परस्मैपदिनः ।
२. अत्र निमित्तापाये नैमित्तिकस्याप्यपाय इति परिभाषया षः सो० ( २ । ३ । ९८ ) इतिसूत्रेण सकारे कृते ठकारस्यापि निवृत्त्या थकारः । धुटि धातुष्वनुस्वारपञ्चमौ नकारजन्यौ रषाभ्याम्–टयोगे च परस्य श्रूयमाणस्य टवर्गस्य तवर्गजन्यत्वात् । एवं संज्ञाशास्त्रदृष्ट्या लक्षणशास्त्रसपन्नष्टवर्गस्यासिद्धत्वेन तद्विरहितस्यैव धातुसंज्ञा बोध्या, तेन च तिष्ठति–इत्यादि सिद्धम् ॥ ३. मकारश्च ' औतिकृवु० ४ । २ । १०८ इत्यादौ विशेषणार्थः ।

अ०—इतः परं षडुदन्ताः षडप्यनुस्वारेतः, चकारात् गतौ, गतावप्येके॥

१८-२६ ऋदन्ताः-स्मृं चिन्तायां, गृं घृं सेचने, ओस्वृं शब्दोपतापयोः, वृं वरणे, ध्वृं ह्वृं कौटिल्ये, सृं गतौ, ऋं प्रापणे च॥

अ०—इतः परमृदन्ता नवानुस्वारेतः, ओदित्, वरणं स्थगनं, चकाराद्गतौ॥

२७ ॠदन्तः, तॄं प्लवनतरणयोः।

अ—ॠदन्तः, प्लवनं मज्जनं, तरणमुल्लङ्घनम्।

२८ एदन्तः ट्धें पाने।

अ०-एदन्तः टकारस्स्तनन्धयीत्यादौ ङ्यर्थः,अनुस्वारेत्॥

२९-४९ एदन्ता दैव् शोधने, ध्यैं चिन्तायां, ग्लैं हर्षक्षये, म्लैं गात्रविनामे, द्यैं न्यङ्करणे, द्रैं स्वप्ने, ध्रैं तृप्तौ, कैं गैं रैं शब्दे, ष्ट्यैं स्त्यैं संघाते च, खैं खदने, क्षैं जैं सैं क्षये, स्रैं श्रैं पाके, पैं ओवैं शोषणे, ष्णैं वेष्टने॥

अ०—इतः परमैदन्ता एकविंशतिरनुस्वारेतश्च। वकारो

१. अयमर्थः सुधातोर्बोध्यः। २. अयं धातुस्सेट्, अनुस्वारेत्त्वाभावात्। ३. बाह्लादिनेत्यादिः। ४. पायतीति रूपं, तद्घटकस्य पा इत्यस्यानर्थकत्वेनार्थवद्ग्रहणपरिभाषया न पिबादेशः।

अवौ दाधौ दा ( ३ । ३ । ५ ) इति दासंज्ञानिषेधार्थः। इह हर्षक्षयो धात्वपचयः । विनामः कान्तिक्षयः, कुत्सितमङ्गं न्यङ्गम्, चकारात् शब्दे, खदनं हिंसा स्थैर्यञ्च। णौ पाके घटादित्वाद् ह्रस्वत्वे श्रपयति, अनेकार्थत्वात् पाकादन्यत्र श्रापयति स्वेदयतीति। ओकारः सूयत्याद्योदितः (४।२।७०), इत्यादौ विशेषणार्थः ॥

इति स्वरान्ताः ।

## अथ ककारादिक्रमेण व्यञ्जनान्ताः ।

१–५ कान्ताः–फक्क नीचैर्गतौ, तक हसने, तकु कृच्छ्रजीवने, बुक्क गतौ, बुक्क भाषणे ॥

अ०–अथ कान्ताः पञ्च सेटः फक्क इत्यत्राकारः श्रुतिसुखार्थः, एवं शेषेष्वप्यदन्तेषु। नीचैर्गतिर्मन्दगमनमसद्व्यवहारो वा। सहनमित्येके। उदित्, उदितः स्वराद् नोऽन्तः (४।४।९८), इति नागमार्थः। भषणं इत्यन्ये, भषणं भर्त्सनम्॥

६–२७ खान्ता–ओखृ राखृ लाखृ द्राखृ ध्राखृ शोषणा-

---

१. तेन क्त–क्तवतुप्रत्यये वानः, वानवानिति सिद्ध्यति।

२. तक धातोरिति बोध्यः। ३. बुक्कधातोरित्यर्थः। ४. भर्त्सनं श्वरवः।

लमर्थयोः, शाखृ श्लाखृ व्याप्तौ, कक्ख हसने, उख नख णख वख मख रख लख मखु रखु लखु रिखु इख इखु ईखुं ॥

अ०—अथ खान्ता द्वाविंशतिस्सेटश्च। ऋदनुबन्धः पश्चानामपि उपान्त्यस्य०(४।२।३५) इति, ह्रस्वनिषेधार्थः। ध्राखृ इत्यमुं नाधीयते। ऋदनुबन्धः पूर्ववद् द्वयोरपि। द्वितीयादिमेतं केचिन्मन्यन्ते ॥

२८–४५ गान्ता—वल्ग रगु लगु तगु श्रगु श्लगु अगु वगु मगु स्वगु इगु उगु रिगु लिगु गतौ, त्वगु कम्पने च, युगु जुगु वुगु वर्जने ॥

अ०—अथ गान्ता अष्टादश सेटो वल्गवर्जा उदितश्च। स्थितस्यैव कम्पनं, चकाराद् गतौ, गतिर्देशान्तरप्राप्तिहेतुः क्रिया ॥

४६–४९ घान्ता—ग्घ हसने, दघु पालने, शिघु आघ्राणे, लघु शोषणे ॥

अ०—अथ घान्ताश्चत्वारः सेटो गग्घवर्जा उदितश्च। घादि-

---

१ कखेति पाणिनीयाः। २ गत्यर्था एते। एते त्रयो धातवः पाणिनीये व्याकरणे इकारानुबन्धा अधिकाः, यथा उखि–वखि–णखि–इति, इकारानुबन्धश्च तन्मते नुमर्थः॥

३ कक्ख धातुमित्यर्थोऽस्य धातोर्घादिसंयुक्तान्ताभाववत्त्वमामनन्ति पाणिनीयाः॥

रयमित्येके । वर्जनेऽपीत्यन्ये । आघ्राणं गन्धोपादानम् । अत्र मधु मण्डन इत्येके पठन्ति ॥

५०–६१ चान्ताः–शुच शोके, कुच शब्दे तारे, क्रुञ्च गतौ, क्रुञ्च च कौटिल्याल्पीभावयोः, लुञ्च अपनयने, अर्च पूजायाम्, अञ्चू गतौ च, वञ्चू चञ्चू तञ्चू त्वञ्चू मञ्चू मुञ्चू म्लुञ्चू म्रुचू म्लुचू ग्लुञ्चू षश्च गतौ। ग्रुचू ग्लुचू स्तेये॥

अ०–अथ चान्ता विंशतिः सेटश्च । तारे उच्च इत्यर्थः, शब्दमात्रेऽपीत्यन्ये, क्रुच संपर्चने–इति ज्वलादौ पठिष्यमाणोऽपि–इहार्थविशेषात् पुनः पठितः । चकारः क्रुञ्चोऽनुकर्षणार्थः–तेन क्रुञ्चस्त्रैयर्थ्यं सिद्धम्, गतेरन्यस्य वा कौटिल्ये, द्रव्यस्याल्पीभावे । अनुपयुक्तापामने । चकारात् पूजायाम् । षश्चवर्जा ऊदितो दश, षश्चो यङ्लुपि दिवि अमासक्–अत्र इनः सः त्सोऽश्चः (१ । ३ । १८), इतिचो वर्जनात् दन्त्योपदिष्टं कार्यं तदादेश्यतालव्यस्याऽभिभवतीति संयोगस्यादौ स्कोर्लुक् ( २ । १ । ८८ ) इति, मस्य लुकि चस्य कत्वम् । गतावपि केचित् ॥

७०–८० छान्ता–म्लेच्छ अव्यक्तायां वाचि. लछ लाछु

१. लुञ्च अपनयन इत्यत्रापनयनस्यार्थोऽयं बोध्यः । २. अञ्चूगतौ चेत्यत्रस्थाचकारादित्यर्थः, तेनाञ्चतीत्यत्र न लोपाभावसिद्धः । ३. म्रुचू ग्लचूबात्वोरिति भावः । ४. अस्फुटेऽपशब्दे चेत्यर्थः । ५. लच्छेति पाणिनीयाः ।

लक्षणे, वाछु इच्छायाम्, आछु आयामे, ह्रीछु लज्जायाम्, हूर्छा कौटिल्ये, मूर्च्छा मोहसमुछ्राययोः, स्फूर्छा स्मूर्छा विस्मृतौ, युछ प्रमादे ॥

अ०–अथ छान्ता एकादश सेटश्च । लच्छति लक्षयतीत्यर्थः, अङ्कयतीति वा, द्वितीयेऽप्ययमेवार्थः । हूर्छादयश्चत्वार आदितः । अत्र उछु उञ्छे, उछै विवासे, इति केचित् पठन्ति तदयुक्तम्, तुदादि पठिताभ्यामेवामूभ्यामभिमतरूपसिद्धेः ॥

८१–१२५ जान्ता–धृज धृजु ध्वज ध्वजु ध्रज ध्रजु वज व्रज षस्ज गतौ, अज क्षेपणे च, कुजू खुजू स्तेये, अर्ज सर्ज अर्जने, कर्ज व्यथने, खर्ज मार्जने च, खज मन्थे, खजु गतेवैंकल्ये, एजृ कम्पने, ट्वोस्फूर्जा वज्रनिर्घोषे, क्षीज कूज गुज गुजु अव्यक्ते शब्दे, लज लजु तर्जभर्त्सने, लाज लाजु भर्जने च, जज जजु युद्धे, तुज हिंसायाम्, तुजु बलने च, गर्ज गजु गृज गृजु मुज मुजु मृज मज मृजु शब्दे, गज मदने च, त्यजं हानौ, षञ्ज सङ्गे ॥

अ०–अथ जान्ताः पञ्चचत्वारिंशत् । त्यज षस्ज वर्जाः

१. तेन आदितः ( ४ । ४ । ७१ ) इति सूत्रेण क्तस्य इडभावे हूर्णः, हूर्णवानित्यादि रूपाणि सिध्यन्ति । २. उञ्छः आपणादौ पतितकणानां एकशो ग्रहणमुञ्छः । ३. विवासः समाप्तिः, प्रायेणायं विपूर्वस्तेन व्युच्छति इति रूपम् ।

सेटश्च, अन्तस्य क्वचिदात्मनेपदमपि दृश्यते, प्रकृतेर्गुण-संमूढाः सज्जन्ते गुणकर्मसु, सज्जमानमकार्येष्विति च। चकाराद् गतौ च। चकाराद् व्यथने। मन्थो विलोडनम्। गतेर्वैकल्यं-विकृतत्वम्। द्वितं द्वितोऽथुः (५।३।८३), इत्यर्थः, ओकारः सूयत्याद्योदितः (४।२।७०), इत्यादौ विशेषणार्थः। चकाराद् भर्त्सने च। चकाराद् हिंसायाम्। बलनं प्राणनं पालनेऽपीत्यन्ये, बहुलमेतन्निदर्शनमितिवचनात्। चुरादित्वे गर्जयति यथा–प्रतिरवपरिपूर्णा गर्जयन्त्यद्रयोऽपि–इति मदनोत्पत्तौ। चकाराच्छब्दे॥

१२६–१६३ टान्ताः––कटे वर्षावरणयोः, शट रुजा-विशरणगत्यवसादनेषु, वट वेष्टने, किट खिट उत्रासे, शिट षिट अनादरे। जट झट सङ्घाते। पिट शब्दे च, भट भृतौ,

१. क्षेपणे चेत्यत्र। २. मार्जने चेत्यत्र।

३. तेन स्फूर्जथुरिति भवति। ४. तेन स्फूर्णः स्फूर्णवानित्यपि भवति। भ्वादेर्नामिनो दीर्घो र्वोर्व्यञ्जने (२।१।६३) इति सूत्रेण दीर्घे सिद्धे पुनरत्र दीर्घपाठो भ्वादौ दीर्घानित्यत्वज्ञापनाय, तेन च कुर्दते–कुर्दन इत्यपि सिद्धम्। ५. भर्जने चेत्यत्रेत्यादिः। भ्राष्ट्रतप्तवालुकाभिः परिपाकविशेषो भर्जनम्। ६. वलने चेत्यत्रेत्यादिः। ७. मदने चेत्यत्रेत्यादिः। ८. एदित्वाद् न श्विजागृशसक्षणह्म्येदितः (४।३।४९).. इति सूत्रेण वृद्धिनिषेधे–अकटीत्–इति सिद्धयति ९. विशरणमवयवविभागः॥

तट उच्छ्राये, खट काङ्क्षे । णट नृत्तौ, हट दीप्तौ, षट अवयवे, कुट विलोटने, चिट प्रैष्ये, विट शब्दे, हेट विबाधायाम्, अट पट इट किट कट कट्ट कटै गतौ । कुट्ट वैकल्ये, मुट प्रमर्दने, चुट चुट्ट अल्पीभावे, वट्ट विभाजने, रुट्ट लुट्ट स्तेये, स्फुट स्फुट्ट विशरणे, लट बाल्ये, रट [ परिभाषणे ] ॥

अ०–अथ टान्ता अष्टात्रिंशत् सेटश्च । वृष्टौ आवरणे चार्थे । चैतुर्षु-अर्थेषु । परिभाषणे घटादित्वं णौ वटयति । उत्रासो भयोद्गतिः, उत्रासनं च । चकारात् संघाते । भृतिर्वेतनं भरणं वा, परिभाषणे घटादित्वाद् भटयति । काङ्क्षाऽस्याऽस्तीति–अभ्रादित्वाद्–अः, काङ्क्षः–काङ्क्षाविशिष्टो धात्वर्थः । नतावित्यन्ये हिंसायामप्येके, नतौ घटादित्वाद् ह्रस्वे नटयति शाखाम्, नृत्तौ हिंसायां च घटादित्वाभावान्न ह्रस्वो नटं नाटयति प्रणाटयति । विलोडन इत्येके । प्रेष्यं दासत्वम् । आक्रोशे इत्यन्ये । उत्रासे पठितोऽप्यर्थभेदात् पुनर्वचनम् । डान्तोऽयमित्येके । उदितोऽयमिति कौशिकः । डान्तोऽयमि-

१. ऐदित्वात् क्तयोरिण्निषेधः, तेन कट्टः, कट्टवान्–इति-रूपम् । २. अविवेको वैकल्यम् । ३. शट धातुरित्यादिः, वर्तत इति शेषश्च । ४. शब्दे चेत्यत्रेत्यादिः । ५. नमयतीत्यर्थः ।

६. नर्त्तयतीत्यर्थः, एवमुन्नाटयति–हिनस्तीत्यर्थः । ७. लुटधातोरितिभावः, डान्तोऽयमित्येके । ८. विटधातोरिति-भावः, केचित्तु बिटं पठन्ति, हिटेत्यन्ये । ९. किटधातोरिति-भावः । १०. कुटधातुरित्यर्थः । ११. मुटधातुरित्यर्थः ।

त्येके । विभाजनं विभागीकरणं । डान्तावित्यन्ये । उदितोऽयमिति केचित् । द्वितीय ऋदित् । कथं स्फुटयति? स्फुटं करोति-इति णिचि भविष्यति, बहुलमेतन्निदर्शनमिति चुरादावदन्तो वा स्फुटण् ज्ञेयः । बाल्यं बाल्यक्रिया ॥

१६४-१८० ठान्ता—रठ च परिभाषणे, पठ व्यक्तायां वाचि, वठ स्थौल्ये, मठ मदनिवासयोश्च, कठ कृच्छ्रजीवने, हठ बलात्कारे, उठ रुठ लुठ उपघाते, पिठ हिंसासंक्लेशयोः, शठ कैतवे च, शुठ गतिप्रतिघाते, कुठु लुठु आलस्ये च, शुठु शोषणे, अठ रुठु गतौ ॥

अ०--अथ रठादयः ठान्ताः सप्तदश सेटश्च । चो लटानुकर्षणार्थस्तेन लटेरर्थद्वयं सिद्धम् । चात् स्थौल्ये, प्लवनकीलबन्धनयोरित्यन्ये । तालव्यादिः, चात् हिंसासंक्लेशयोः । तालव्यादिः । चात् गतिप्रतिघाते । तालव्यादिः ॥

---

१. रुटु लुटु धातू इत्यर्थः । २. स्फुटधातुरित्यर्थः । ३. स्फोटयतीति भवितव्यमित्याशयेन शङ्कते कथमिति । ४. चुरादावपि धातुपाठे पठितस्य स्फुटणः स्फोटणयतीत्येव रूपं परन्तु अदन्तधातुनिर्देशानां बाहुलकत्वात् तत्र स्फुटमभ्युपेत्य स्फुटयतीति साधनीयमिति भावः ।

५. मदनिवासयोश्चेत्यत्रेत्यादिः । ६. शठधातुरित्यादिः । ७. शुठधातुरित्यादिः । ८. आलस्ये चेत्यत्रेत्यादिः । ९. शुठुधातुरित्यादिः ।

१८१--२१० डान्ताः-पुड्ड प्रमर्दने, मुड्ड खण्डने च, मड्ड भूषायाम्, गड्ड वदनैकदेशे[१], शौड्ट गर्वे, यौड्ट सम्बन्धे, मेड्ट म्रेड्ट म्लेड्ट लोड्ट लौड्ट उन्मादे, रोड्ट रौड्ट तौड्ट अनादरे, क्रीड्ट विहारे, तुड्ट तूड्ट तोडने[२], जौड्ट हुड्ट हूड्ट हूड्ट होड्ट गतौ, खोड्ट प्रतिघाते, विड आक्रोशे, अड उद्यमे, लँड विलासे, कडु मदे, कड्ड कार्कश्ये, अड्ड अभियोगे[४], चुड्ड हावकरणे[५] ॥

अ०-अथ डान्ताः त्रिंशत् सेटश्च । चात् प्रमर्दने । *गण्ड गतसंहननक्रियायामित्यर्थः । ताल्व्यादिः । संबंधः श्लेषः । तोडनं दारणं । गतावित्यनुवृत्तेर्गतिविषये प्रतिघाते, कडमप्येकेऽत्र पठन्ति, स तुदादिपाठेनैव गतार्थ इति नेहाधीतः । दोपान्त्योऽयं तवर्गस्य श्चवर्गष्टवर्गाभ्यां योगे चटवर्गौ (१।३।६०),

१. वदनैकदेशे क्रियायामित्यर्थः । २. तोडनं-दारणं-हिंसनं च । ३. लडयोरलयोश्चैकत्वस्मरणाल्ललतीति केचित् । ४. अभियोगस्त्वभिग्रहः । ५. हावकरणमभिप्रायसूचनम्, कड्वादयस्त्रयो दोपान्त्यास्तेन क्विपि कुत्-अत्-चुत्-इत्यादिरूपं भवति, अन्ये तु डोपान्त्यं मन्यन्ते तन्मते सान्ते अडिड्डिषति-इतिरूपम्, दोपान्त्यत्वे-अड्डिडिषतीति भवति । ६. खण्डने चेत्यत्रेत्यादिः, पुड्डच् इत्येके तेन पुण्डरिकमित्यादि सिद्धम् । *वदनशब्दार्थमाह-गण्डेति । ७. संयुक्तडान्तोऽयम् इति केचित् तेन तुड्डति-इति भवति । ८. कड्ड धातुः ।

इति दस्य डत्वे कुड्तीति भवति, अपरे तु डोपान्त्योऽयं मन्यन्ते । डोपान्त्योऽयमिति केचित् । हावो भावसूचनं दोपान्त्योऽयं तवर्गस्य० ( १ । ३ । ६० ) इति दस्य डत्वे चुड्डति, क्विपि सौ पदस्य ( २ । १ । ८९ ), इति संयोगान्तलोपे चुत्, डोपान्त्योऽयमित्यन्ये, चुट्-चुड् एवं पूर्वयोरपि स्वमते परमते च क्विपि रूपाणि ज्ञेयानि ॥

२११-२२९ णान्ता-अण रण वॅण व्रण बण भण भ्रण मण धण ध्वण ध्रॅण कण क्वण चण शब्दे, ओणृ अपनयने, शोणृ वॅर्णगत्योः, श्रोणृ श्लोणृ संघाते, पैणृ गतिप्रेरॅणश्लेषणेषु ॥

अ०-अथ णान्ता एकोनविंशतिः सेटश्च, शब्दः शब्दक्रिया, अत्र रणस्य गतौ, कणस्य गतौ, चणस्य हिंसा-दानगतिषु, घटादित्वाण्णौ ह्रस्वत्वे रणयति कणयति चणयति, अन्यत्र राणयति काणयति चाणयति-इति इह च शब्दार्थत्वेऽविशेषेऽपि रणितं नूपुरादौ, मणितं सुरतरुजिते क्वणितमार्चे,

१. अङ्क धातुः । २. वकारादित्वात् नशमददिवादिगुणिनः (४-१-३०) इत्यनेन एत्वाभावात्-ववणतुः-इति भवति । ३. उपदेशे नान्तोऽयम्, तेन यङ्लुकि-दन्ध्रन्ति-इतिरूपम् । ४. वर्णश्चात्र रक्त एव ' लोहितो रोहितो रक्तश्शोण ' इति कोषात्, गतिर्गमनम् । ५. प्रेरणं भृत्यादीनां प्रेषणं, श्लेषणं संबन्धः, पैणृ इति केचित् ॥

क्वणितं वीणादौ रूढमेवमन्यत्रापि, कूजितं विहगादौ बृंहितं गजे, हेषितं हये, त्रासितं पशुषु, गर्जितं मेघादौ, गुञ्जितं सिंहादौ, इत्यादिकं लक्ष्यादभ्यूह्यम् । ऋदित्वाण्णौ ङे उपान्त्यस्यासमानलोपिशास्वृदितो ङे ( ४ । २ । ३५ ) इति ह्रस्वाभावे मा भवानोणिणत्, ननु नित्यत्वाद् अन्तरङ्गत्वाच्च द्वित्वे कृते उपान्त्याभावादेव ह्रस्वो न प्राप्नोति, किमृदित्करणेन ? सत्यं, इदमेव ऋदित्करणं ज्ञापकं, नित्यमन्तरङ्गं च द्वित्वमुपान्त्यह्रस्वो बाधते, तेनान्यत्रापि पूर्वं ह्रस्वः पश्चाद् द्वित्वं मा भवानटिटत्-मा भवानशिशदित्यादिः। तालव्यादिः॥

२३०-२३९ तान्ताः—चिंतै संज्ञाने, अत सातत्यगमने, च्युतृ आसेचने, चुतृ श्चुतृ श्च्युतृ क्षरणे, जुतृ भासने, अतु बन्धने, कित निवासे, कृत घृणागतिस्पर्धेषु ॥

अ०—अथ तान्ता दश सेटश्च । संज्ञानं संवित्तिः । सातत्येन गमनं-गतिः । आसेचनम्-ईषत्सेकः । क्षरणं स्रवणम् । द्वावपि* दन्त्यादी, अन्ये तु-इतु बन्धने-इति पेठुः, धातुनामनेकार्थत्वात् कितः संशयप्रतीकारे ( ३ । ४ । ६ ), इति स्वार्थे सन् विचिकित्सति मे मनः, चिकित्सति आतुरं वैद्यः।

१. ऐदित्त्वाद् डीयश्व्यैदितः क्तयोः ( ४ । ४ । ६१ ), इतिसूत्रेण क्तयोर्नेट् तेन चित्तः-चित्तवानिति रूपम् । २. आसेचनमार्द्रीकरणम्, आङीषदर्थेऽभिव्याप्तौ च । ३. संशेत इत्यर्थः । ४. प्रतिकरोतीत्यर्थः । * अतुकितधातू ।

निग्रहविनाशावपि प्रतिकारस्यैव भेदौ तेन क्षेत्रे चिकित्स्यः पारदारिकः, चिकित्स्यानि क्षेत्रे तृणानि ॥

२४०–२४५ थान्ताः–कुथु पुथु लुथु मथु मन्थ मान्थ हिंसा–संक्लेशनयोः ॥

अ०–अथ थान्ता षट् सेटश्च । हिंसा प्राण्युपघातः । संक्लेशो बाधा । मन्थो नोपान्त्यः, विलोडनेऽयमित्येके[3]॥

२४६–२७१ दान्ताः–खादृ भक्षणे, बद स्थैर्ये, खद हिंसायां च, गद व्यक्तायां वाचि । रद विलेखने, णद जिक्ष्विदा अव्यक्ते शब्दे, अर्द गतियाचनयोः, नर्द णर्द गर्द शब्दे, तर्द हिंसायाम्, कर्द कुत्सिते शब्दे, खर्द दशने, अदु बन्धने, इदु परमैश्वर्ये, बिदु अवयवे, णिदु कुत्सायाम्, टुनदु समृद्धौ, चदु दीप्त्याह्लादनयोः, त्रदु चेष्टायाम्, कदु क्रदु क्लदु रोदनाह्वानयोः, क्लिदु परिदेवने, स्कन्दृं गतिशोषणयोः ।

अ०–अथ दान्ताः षड्विंशतिः । स्कन्दृं वर्जाः सेटश्च । ओष्ठयादिः, चात् स्थैर्ये, विलेखनं–उत्पाटनम्, शब्दमात्र

१. निग्राह्य इत्यर्थः । २. विनाशयितव्यानीत्यर्थः, निवासे तु केतयतीतिरूपम् ३. विलोडनं प्रतिघातः । ४. शोक इत्यर्थः । ५. हिंसायाञ्चेत्यत्रेत्यादिः, केचित्तु भक्षणेऽपीति वदन्ति, स्थैर्येऽकर्मकः । ६. णद ञिक्ष्विदाधातू–इतिभावः ।

इत्यन्ये, ञि-अनुबंधो ज्ञानेच्छार्चार्थञीच्छील्यादिभ्यः क्तः (५।२।९२), इति सत्यर्थे क्तार्थः, आदित्वात् क्तयोर्वेटनुस्वारेदयमित्येके। दान्त्योऽयमित्येके । अभ्यर्दितश्चौरः पीडित इत्यर्थः, अत एव याचनस्थाने यातनेत्येके पठन्ति। दशनमिह दंदशूककर्तृकं दन्तकर्मस्वभावत्वाच्च धातुः साधन-प्रधानप्रयोगे समवायी, पूर्वे तु खर्द दंदशूके इति पठन्ति, व्याचक्षते च दंदशनशीलो दंदशूक उच्यते, अनेन च तद्विषया क्रिया लक्ष्यते(अनेका-)र्थत्वात्, धातोर्दंदशनेति यङन्तनिर्देशेऽपि तद्विषया क्रिया प्रतीयते, किन्तु साधननिर्देशः साधनप्रधानप्रयोगे समवायित्वज्ञापनार्थं इति। परमैश्वर्यं परमेशनक्रिया। अवयवैकदेशो, अनेन स्वगता क्रिया लक्ष्यते। ट्वनुबन्धः ट्वितोऽथुः (५।३।८३), इति-अथ्वर्थः। आह्लादनं आह्लादः-आनन्दोत्पादनमित्यर्थः। आस्कन्द्यते चनीस्कन्द्यते-इति लक्ष्येन लोपो न दृश्यते स चेत्च्छिष्टसंमतस्ततो न लोपो भावितव्यः, इतिवाचकवार्तिकम् ॥

२७२-२७४ धान्ता-षिधू गत्याम्, षिधौ शास्त्रमाङ्गल्ययोः, शुन्ध शुद्धौ ॥

अ०-अथ धान्तास्त्रयोऽनेकार्थत्वाच्च निषेधेऽपि वर्तते। शास्त्रं शास्त्रविषयं शासनं, माङ्गल्यं मङ्गलविषया क्रिया। अनयोरेवार्थयोरयमौदित्, अर्थान्तरे तु पुनरूदित्पूर्वक एव,

१. तेन नन्दथुरिति भवति।

अन्यथा तत्पाठोऽनर्थकः स्यात्, अर्थान्तरेऽप्यनेनैव वेड् विकल्पस्य सर्वत्रैव सिद्धत्वात् ॥

२७५–२८३ नान्ताः–स्तन धन ध्वन चन स्वन वन शब्दे, वन–षन संभक्तौ, कनै दीप्ति–कान्ति–गतिषु ॥

अ० अथ नान्ता नव सेटश्च । ध्वनेः शब्देः घटादित्वाण्णौ ध्वनयति, अन्यत्र ध्वानयति, स्वन शब्दे, चन हिंसायाम्, स्वनोऽवतंसने घटादित्वं नान्यत्र, स्वनोदन्त्यादिः, अर्थभेदात् पुनरधीतस्स्वनिः, भक्तिर्भजनम्, दीप्तिः प्रकाशः, कान्तिः शोभा॥

२८४–२९८ पान्ता—गुपौ रक्षणे, तपं धूपसंतापे, रप लप जल्प व्यक्ते वचने, जप मानसे च, चप सान्त्वने, षप संमवाये, सृप्लृं गतौ, चुप मन्दायाम्, तुप तुम्प त्रुप त्रुम्प हिंसायाम् ॥

अ०—अथ पान्ताः पञ्चदश । गुपौ वेट्, तपं अनिट् शेषाः सेटः, मनोनिर्वत्यिवचने-चाद् व्यक्ते । दन्त्यादिः । गतावित्यनुवृत्तेर्मन्दायां गतौ ।

---

१. व्यवोपसर्गाभ्यां योगे त्वशने षत्वम्, विष्वणति–अवष्वणति–भुङ्क्ते-इत्यर्थः। सशब्दं भुङ्क्ते, भुञ्जानः कञ्चन शब्दं करोतीति वा केचित्। २. वनेरर्थभेदात् पुनः पाठः ॥ ३. समवायसम्बन्धः, सम्यगवबोधो वा। ४. मानस इत्यस्यार्थोऽयम्। ५. सृप्लृंधातुरित्यर्थः लृदित्वात् ङेअसृपदिति।

२९९–३०५ फान्ताः––तुफ तुम्फ त्रुफ त्रुम्फ हिंसा-याम्, वर्फ रफ रफु गतौ ॥

अ०––फान्ताः सप्त सेटश्च । तुफ तुम्फ त्रुफ त्रुम्फा-स्तुदादावपीत्यन्ये, सप्ताप्येते गतार्थाः ॥

३०६–३२३ बान्ता––अर्ब कर्ब खर्ब गर्ब चर्ब तर्ब नर्ब पर्ब बर्ब शर्ब षर्ब सर्ब रिबु रबु गतौ, कुबु आच्छादने, लुबु तुबु अर्दने, चुबु वक्त्रसंयोगे ॥

अ०––अथ बान्ता अष्टादश सेटश्च । अर्बेत्यादौरस्थाने न पठन्ति कौशिकाः–बर्ब ओष्ठ्यादिः, शर्ब तालव्यादिः, सर्बो दन्त्यादिः । अत्र गर्बेत्यपि केचित् पठन्ति स पुनरनर्थत्वादुपेक्षितः, वक्त्रेण संबन्धे नभस्तुङ्गशिरश्चुम्बी त्युपचारात् ॥

३२४–३३१ भान्ताः––स्रभू स्रंभू स्रिभू षिभू भर्भ हिंसायाम्, शुम्भ भाषणे च, यभं जभ मैथुने ॥

अ०––अथ भान्ता अष्टौ । आद्या स्त्रयोऽपि दन्त्याद्याः, चतुर्थः षोपदेशः, चाद् हिंसायां भासने चेत्यन्ये, तालव्यादिः षोपदेशोऽयमिति गुप्तः, मिथुनस्य कर्म भावो वा, पूर्वोऽ-न्तस्थादिः, अन्यश्चवर्गादिः ॥

---

१. अर्दन पीडा । २. वक्त्रसंयोग इत्यस्यार्थोऽयं–चुम्बन-मिति भावः ।

३३२-३४८ मान्ताः—चमू छमू जमू कमू जिमू अदने, क्रमू पादावक्षेपे, यमूं उपरमे, स्यमू शब्दे, णमं प्रह्वत्वे, षम ष्टम वैक्लव्ये, अम शब्दभक्त्योः, अम द्रम हम्म मीमृ गम्लृं गतौ ॥

अ०–अथ मान्ताः सप्तदश। यमूं णमं गम्लृं वर्जाः सेटश्च, पञ्चोदिताः। पादन्यासः, उपरमो–निवृत्तिः, प्रह्वत्वं–नम्रत्वं, वैक्लव्यं–कातरत्वं, भक्ति–भंजनं, अमस्यार्थभेदात् पुनः पाठः, हम्मस्यार्धबद्धो मकारः, मीमृं शब्देऽपीत्यन्ये।

३४९-३५६ यान्ता—हय हर्य कान्तौ च, मव्यं बन्धने, सूक्ष्यं ईक्ष्यं ईष्यं ईर्ष्यार्थाः, शुच्यै चुच्यै अभिषवे[3] ॥

अ०—अथ यान्ता अष्टौ सेटश्च। चाद् गतौ, सूक्ष्यो दन्त्यादिः, ईर्ष्या–क्षमजमसहनं, तालव्यादिः, द्रवेण–अद्रवाणां परिशासनं–अभिषवः स्नानमिति चान्द्राः ॥

३५७-३६४ रान्ताः—स्मर छद्मगतौ, कमर हूर्च्छने, अभ्र वभ्र मभ्र गतौ, चर भक्षणे च, धोरृ गतेश्चातुर्ये, खोरृ प्रतिघाते ॥

१. रज्वादिकरणकगत्यादिरोधहेतुः संयोगानुकूलव्यापारो बन्धनम्। २. अनिष्टानुपेक्षणम्–ईर्ष्या, परोत्कर्षगोचरो द्वेष इति वा। ३. अवयवानां शिथिलीकरणम्, सुरायाः सन्धानं वा अभिषवः सोममभिषुणोति, सन्धानं स्यादभिषवः, वारौंक्षोनभिषुण्वत इत्यादि प्रयोगात्।

अ०—अथ रान्ता अष्टौ सेटश्च । तादिरयं, छद्मप्रकारं कौटिल्ये, चाद् गतौ, गतेरित्यनुवृत्तेर्गतिप्रतिघाते ॥

३६५-४०४ लान्ताः—दल जिफला विशरणे, मील स्मील श्मील क्ष्मील निमेषणे, पील प्रतिष्टम्भे, णील वर्णे, शील समाधौ, कील बन्धे, कूल आवरणे, शूल रुजायाम्, तूल निष्कर्षे, पूल संघाते, मूल प्रतिष्ठायाम्, फल निष्पत्तौ, फुल्ल विकसने, चुल्ल हावकरणे, चिल्ल शैथिल्ये च, पेलृ फेलृ शेलृ पेल्लृ सेल्लृ वेल्लृ सल तिल तिल्ल पल्ल वेल्ल गतौ, वेलृ चेलृ केलृ क्वेलृ खेलृ स्खल चलने, खल संचये च, श्वल श्वल्ल आशुगतौ गल [ अदने ]

अ०—अथ लान्ताश्चत्वारिंशत् सेटश्च । केचिद् घटादौ पाठाण्णौ ह्रस्वे दलयति-इति मन्यन्ते । जनुबन्धो ज्ञानेच्छेति (५-२-९२) सत्यर्थे क्तार्थः । श्मीलस्तालव्यादिः, स्मीलो दन्त्यादिः, निमेषणं-संकोचः, प्रतिष्टम्भो-रोधनम्, वर्णोपलक्षितायां क्रियायां यथा श्वेतं नीलमिति मरकतकान्त्या, समाधिरैकाग्र्यं तालव्यादिः, शूलस्तालव्यादिः, निष्कर्षोऽन्तःस्थस्य बहिर्निस्सारणम्, निष्पत्तिः-सिद्धिः, मैथुनेच्छाप्रेरितशरीरविकारो-हावकरणम्, चकाराद् हावकरणे, शेलृस्तालव्यादिः, सेल्लृदन्त्यादिः सलश्च, चलने तालव्यादिश्शलमप्यत्रैके पठन्ति, तच्छ्वलादिपाठेनैव गतार्थ इति नेहाधीतः, श्रवणेऽप्ययमनेकार्थत्वात् ॥

४०५-४४१ वान्ताः—चर्वं अदने, पूर्वं पर्वं मर्वं पूरणे, गर्वं थिंवु शव गतौ, कर्वं खर्वं गर्वं दर्पे, ष्ठिवू क्षिवू निरसने, जीव प्राणधारणे, पीव मीव तीव नीव स्थौल्ये, उर्वैं तुर्वैं थुर्वैं दुर्वैं धुर्वैं जुर्वैं अर्व भर्व शर्व हिंसायाम्, मुर्वैं मव बन्धने, गुर्वैं उद्यमे, पिवु मिवु निवु सेचने, हिवु दिवु जिवु प्रीणने, इवु व्याप्तौ च, अव रक्षण-गति-कान्ति-प्रीति-तृप्ति-अवगमन-प्रवेश-श्रवण-स्वाम्यर्थयाचनक्रियेच्छादीप्ति-अवाप्ति-आलिङ्गन-हिंसा-दहन भाववृद्धिषु ॥

अ०—अथ वान्तास्सप्तत्रिंशत् सेटश्च । त्रयोऽप्यूदितः, सेवने[3] इत्येके त्रयोऽप्युदितः । चात् प्रीणने, एकोनविंशता-वर्थेषु, केचित् कान्तिवर्जनादष्टादशस्वर्थेषु, अन्यैस्तु रक्षणगति-कान्ति-प्रीति-तृप्ति-वृद्धिषु षट्सु ॥

४४२-४४८ शान्ताः—कश शब्दे, मिश मश रोषे च, शशू प्लुतिगतौ, णिश समाधौ, दृशृ प्रेक्षणे, दंशं दशने ॥

अ०—अथ शान्तास्सप्त । आद्याः पञ्च सेटश्च । सौत्रोऽयमित्येके, चाच्छब्दे-शब्दने-रोचनक्रियायां चेत्यर्थः, ताल-व्यादिः, प्लुतिगमने-उत्प्लुत्यगमन इत्यर्थः, दशनं दन्तकर्म।

---

१. धिवुं प्रीणने केचित् । २. कान्तिरत्र शोभा-इच्छा वा, दीप्तेः पृथग् ग्रहणात्, दीप्तिस्तेजः, तृप्तिरिच्छानाशः, स्वाम्यर्थः-स्वामिधर्मः, प्राणवियोगानुकूलव्यापारो हिंसा, आदानं-ग्रहणम् । ३. पिवु मिवु निवु धातूनाम् । ४. व्याप्तौ चेत्यत्रेत्यादिः ॥

४४९–४८९ षान्ता––घुषृ शब्दे, चूष पाने, तूष तुष्टौ, पूष वृद्धौ, लूष मूष स्तेये, षूष प्रसवे, ऊष रुजायाम्, ईष उञ्छे, कृषं विलेखने, कष शिषजष झष वष मष मुष रुष रिष यूष जूष शष चष हिंमायाम्, वृष संघाते च, भष भर्त्सने, जिषू विषू मिषू निषू पृषू वृषू सेचने, मृषू सहने च, उषू श्रृषू श्लिषू प्रुषू प्लुषू दाहे, घृषू संघर्षे, हृषू अलीके, पुष पुष्टौ, भूष [ अलङ्कारे ] ॥

अ०––अथ षान्ता एकचत्वारिंशत् कृषं वर्जाः सेटश्च । उञ्छ–उच्चयनम्, विलेखनं–हलोत्कर्षणम्, शिषस्तालव्यादिः, शषस्तालव्यादिः,चाद् हिंसायाम्,भर्त्सनं–कुत्सितशब्दकरणम्, अतो भर्त्सनं शब्दकर्मकोऽयम्, षडप्यूदितः. चकारात् सेचने पश्चाप्यूदितः ॥

४९०–५०२ सान्ताः–तसु अलङ्कारे, तुस ह्रस ह्लस रस शब्दे, लस श्लेषणक्रीडनयोः, घस्लृं अदने, हस हसने, पिसृ पेसृ वेसृ गतौ, शसू हिंसायाम्, शंसू स्तुतौ च ।

अ०—अथ सान्तास्त्रयोदश घस्लृं वर्जाः सेटश्च । शसू स्तालव्यादिः, चाद् हिंसायां तालव्यादिः ॥

५०३–५१७ हान्ताः—मिहं सेचने, दहं भस्मीकरणे,

१. संघाते चेत्यत्रेत्यादिः । २. सहने चेत्यत्रेत्यादिः । ३. पृषू वृषू हिंसा–सङ्क्लेशनयोश्चेत्यपि केचित् ॥

चह कल्कने, रह त्यागे, रहु गतौ, दृह दृहु बृह वृद्धौ, बृहृ बृहु शब्दे च, उहृ तुहृ दुहृ अर्दने, अर्ह महपूजायाम्॥

अ०—अथ हान्ताः पञ्चदश मिहं दहं वर्जाः सेटश्च। कल्कनं–शाठ्यम्, चकाराद् वृद्धौ, ऋदितस्त्रयोऽपि॥

५१८–५३७ क्षान्ता—उक्ष सेचने, रक्ष पालने, मक्ष मुक्ष संघाते, अक्षौ व्याप्तौ च, तक्षौ त्वक्षौ तनूकरणे, णिक्ष चुम्बने, तृक्ष स्तृक्ष णक्ष गतौ, वक्ष रोषे, त्वक्ष त्वचने, सूर्क्ष अनादरे, काक्षु वाक्षु माक्षु काङ्क्षायाम्, द्राक्षु ध्राक्षु ध्वाक्षु घोरवासिते च॥

## परस्मैभाषाः

अ०—अथ क्षान्ता विंशतिः सेटश्च क्षान्तानां षान्तेषु पाठे युक्ते वैचित्र्यार्थमिह कृतः, चकारात् संघाते, तनूकरणं–कार्श्यम्, चुम्बनं–वक्त्रसंयोगः, संघात इत्येके, त्वचनं–त्वग्ग्रहणं–संवरणं वा, यान्तोऽयमित्येके, चकारात् काङ्क्षायाम्, एते निरनुबन्धित्वात् शेषात् परस्मै (३।३।१००)

इति परस्मैपदिनः॥

## अथात्मनेपदिनः ।

अथ इङितः कर्त्तरि ( १ । ३ । १२ ), इत्यात्मनेपदिनः । आईक्षेर्वर्णसमाम्नायक्रमेण वक्ष्यन्ते ॥

### आत्मनेपदिनः

५३८–५६० अथादन्तः–गाङ् गतौ । इदन्तः–ष्मिङ् इषद्धसने । ईदन्तः–डीङ् विहायसा[1] गतौ । उदन्ता उङ् कुङ् गुङ घुङ् ङुङ शब्दे, च्युङ छ्युङ् ( छ्युङ् इत्यन्यत्र नास्ति ) ज्युङ् जुङ् प्रुङ् प्लुङ् (प्लुङ् इति सेट् च) गतौ, रुङ् रेषणे च । ऊदन्तौ–पूङ पवने, मूङ् बन्धने । ऋदन्तः–धृङ् अवध्वंसने । एदन्तौ मेङ् प्रतिदाने, देङ् [ पालने ] ऐदन्ताः—त्रैङ् पालने, श्यैङ् गतौ, प्यैङ् वृद्धौ ॥

अ०—अथादन्त एकोऽनिट् च । अथ इदन्त एकः सेट् । अथेदन्त एकः सेट् च । अथोदन्ता द्वादश सर्वेऽनिटश्च, चकाराद् गतौ, रेषणं–हिंसा । अथौदन्तौ द्वौ सेटौ च । पवनं[2] नीरजीकरणम् । अथर्दन्तोऽनिट् चूरादेराकृतिगणत्वाद् धारयति, उभयपदिषु पठिष्यमानस्याप्यस्य विध्वंसने धरतीति

१. पक्षिणां गतावित्यर्थः, विहायसा गतावित्यपि केचिदाकाशेन गमनमित्यर्थः । २. रजोरहितकरणं–नीरजीकरणम् ॥

प्रयोगनिवृत्त्यर्थ इह पाठः । अथैदन्तौ द्वौ अनिटौ च, प्रतिदानं-प्रत्यर्पणम । अथैदन्तास्त्रयोऽनिटश्च श्यैङ्-तालव्यादिः ।

५६१-५९० कान्ता—वकुङ् कौटिल्ये, मकुङ् मण्डने[1] अकुङ् लक्षणे, शीकृङ् सेचने, लोकृङ् दर्शने, श्रोकृङ् श्लोकृङ्, संघाते[2]। द्रेकृङ् ध्रेकृङ् शब्दोत्साहे, रेकृङ् शकुङ् शङ्कायाम्, ककि[3] लौल्ये, कुकि वृकि आदाने, चकि तृप्ति-प्रतिघातयोः, ककुङ् श्वकुङ् त्रकुङ् श्रकुङ् श्लकुङ् ढौकृङ् त्रौकृङ् ष्वष्कि वस्कि मस्कि तिकि टिकि टीकृङ् सेकृङ् स्रेकृङ् [ गतौ ]

अ०—अथ कान्तास्त्रिंशत् सेटश्च । गैताविल्येके । लक्षणं चिह्नम् । तालव्यादिः । संघातः-संहननम् , संहन्यमानश्च । शब्दोत्साह-औद्धत्यम् , वृद्धिश्च । शङ्का संदेहः । पूर्वस्यार्थः-यदाहुः-आरेका संशयेऽप्याहुः, द्वितीयस्यार्थस्त्रासश्च । लौल्यं गार्ध्य-चापलं च । उँक्तार्थयोर्घटादिरितिणौ ह्रस्वत्वे चकयति, अर्थान्तरे तु ह्रस्वाभावे चाकयति । श्वकुङ् श्रकुङ् श्लकुङ्

---

१. मण्डनं-शोभनम् । २. संघातो-ग्रन्थः स चेह ग्रथ्यमानस्य व्यापारो ग्रथितुर्वा । आद्योऽकर्मको ग्रथितुर्व्यापारे तु सकर्मकः । ३. इकारोऽत्रात्मनेपदार्थः । ४. वकुङ् धातुः । ५. रेकृङ् धातोरित्यर्थः । ६. शकुङ् धातोरित्यर्थः ॥ ७. तृप्तिप्रतिघातार्थयोरित्यर्थे चकिधातुरिति शेषः, तृप्तावेव घटादिरिति केचित्, तन्मते प्रतिघाते णौ चाकयतीति रूपम् ॥

तालव्यादयः । वस्किमस्की दन्त्योपान्त्यौ, सेकृङ् स्रेकृङ् दन्त्यादी ॥

५९१–५९९ घान्ता–रघुङ् लघुङ् गतौ, अघुङ् वघुङ् गत्याक्षेपे, मघुङ् कैतवे च, राघृङ् लोघृङ् सामर्थ्ये, द्राघृङ् आयासे च, श्लाघृङ् कत्थने ॥

अ०––अथ घान्ता नव सेटश्च । लघुङ् भोजन–निवृत्त्यर्थोऽपि, नवज्वरो लङ्घनीयः[१] गतेराक्षेपो वेगः, आरम्भ उपलम्भो वा, कैतवं वञ्चना, चकाराद् गत्याक्षेपे, चात् सामर्थ्ये, आयासः कदर्थनम्–कौशिकस्तु आयामः–इत्याह । दैर्ध्यविशिष्टायां क्रियायां चाऽऽख्यात्, कालिपकैर्हि प्रकृतिप्रत्ययविभागे द्राघिमादयः कस्मिंश्चिद् व्याकरणे धातोरेव साधिता एवं नेदत्यादेर्नेदिष्टादयोऽपि । कत्थनमुत्कर्षाख्यानम् ॥

६००–६१२ चान्ताः––लोचृङ् दर्शने, षचि सेचने, शचि व्यक्तायां वाचि, कचि बन्धने, कचुङ् दीप्तौ च, श्वचि श्वचुङ् गतौ, वर्चि दीप्तौ, मचि मुचुङ् कल्कने, मचुङ् धारणोच्छ्रायपूजनेषु च, पचुङ् व्यक्तिकरणे । ष्टुचि प्रसादे ॥

अ०—अथ चान्तास्त्रयोदश सेटश्च । सेचनं–सेवनम्, भजनमिति यावत् । तालव्यादिः । चाद् बन्धने । कल्कनं दम्भः, शाठ्यं कत्थनं च । चात् कल्कने–दीप्तावपीत्येके ॥

---

१. अत्र देही विवक्षितः, लङ्घनीय उपवसनीय इत्यर्थः ।

६१३-६२१ जान्ताः—एजृङ् भ्रेजृङ् भ्राजि दीप्तौ, इजुङ् गतौ, ईजि कुत्सने च, ऋजि गतिस्थानार्जनोपार्जनेषु, ऋजुङ् भृजैङ् भर्जने, तिजि क्षमानिशानयोः ॥

अ०-अथ जान्ता नव सेटश्च । चाद् गतौ, भर्जनं पाकप्रकारः, निशानं तीक्ष्णीकरणम् ॥

६२२-६२८ टान्ताः—घट्टि चलने, स्फुटि विकसने,चेष्टि चेष्टायाम् ,गोष्टि लोष्टि संघाते, वेष्टि वेष्टने,अट्टि हिंसातिक्रमयोः।

अ०—अथ टान्ताः सप्त सेटश्च । डान्तोऽयम्, उदिचेत्येके । चेष्टा-ईहा । वेष्टनं-ग्रथनम् लोटनं परिहाणिश्च । अतिक्रम उल्लङ्घनम् । दोपान्त्योऽयम्[2] । तोपान्त्योऽयं[3] इत्येके, केचिद् वान्तः, टोपान्त्यश्चेति मन्यन्ते ॥

६२९-६३५ ठान्ताः—एठि हेठि विबाधायाम्[4], मठुङ् कठुङ् शोके, मुठुङ् पलायने,वठुङ् एकचर्यायाम्, अठुङ् गतौ॥

अ०—अथ ठान्ताः सप्त सेटश्च । शोकोऽऽत्राऽऽध्यानम् । एकस्याऽसहायस्य चर्या गतिः[5] तस्याम् ॥

१.अर्जनं तु प्राधान्येन, उपार्जनं च प्रासङ्गिकम् । २. तेन अट्टिटिषते–आट्टिटद्–इत्यादि सिद्धयति । ३. तेन अटिट्टिषते–आटिट्टद् इत्यादीनि रूपाणि भवन्ति । ४. विबाधनं शाठ्यम् ५. न गमनमत्रोत्तरदेशसंयोगानुकूलव्यापारमात्ररूपं किन्तु स्थित्यनुकूलव्यापाररूपमपि, तेनापत्यरहितायां विधवायाञ्च'वण्ठा'इति प्रयोगसिद्धिः ॥

६३६–६५८ डान्ताः––पडुङ् ( पठुङ ) गतौ, हुडुङ् पिडुङ् सङ्घाते, शडुङ् रुजायाञ्च, तडुङ् ताडने, कडुङ् मदे, खडुङ् मन्थे, खुडङ् गतिवैकल्ये, कुडुङ् दाहे, वडुङ् मडुङ् वेष्टने, भडुङ् परिभाषणे[1] मुडुङ् मज्जने, तुडुङ् तोडने, भ्रुडुङ् वरणे, चडुङ् कोपे, द्राडृङ् ध्राडृङ् विशरणे, शाडृङ् श्लाघायाम्, वाडृङ् आप्लाव्ये, हेडृङ् होडृङ् अनादरे, हिडुङ् गतौ च ।

अ०—अथ डान्तास्त्रयोविंशतिः सेटश्च । चात् संघाते, तालव्यादिः, विभाजनेऽप्यन्ये विभाजनं–विभागीकरणम्, मज्जनं–शोधनम् न्यग्भावश्च, तोडनं–हिंसा, वरणं–स्वीकरणम्, तालव्यादिः, आप्लाव्यं–आप्लावनम्, चकारादनादरे ॥

६५९–६६४ णान्ताः–घिणुङ् घुणुङ् घृणुङ् ग्रहणे, घुणि घूर्णि भ्रमणे, पणि[2] व्यवहार–स्तुत्योः ॥

अ०—णान्ताः षट् सेटश्च ॥

६६५–६६७ तान्ता—यतैङ् प्रयत्ने, युतृङ् जुतृङ् भासने ।

अ०—अथ तान्तास्त्रयः सेटश्च । कौशिकस्तु ज्योतिः

---

१. परिहासः सनिन्दोपालम्भश्च परिभाषणम् । २. अत्रेकारानुबन्धस्यात्मनेपदार्थस्यायप्रत्ययाभावपक्षे चरितार्थत्वादायान्तस्य नात्मनेपदत्वम् ॥

सिद्धये जुतिस्थाने ज्युतिमधीते तदसत् च्युतेरादेश्च (उ० ९९१) इति सिद्धत्वात् ॥

६६८–६७३ थान्ता—विथृङ् वेथृङ् याचने, नाथृङ् उपतापैश्वर्याशीःषु च, श्रथुङ् शैथिल्ये, ग्रथुङ् कौटिल्ये, कत्थि श्लाघायाम् ।

अ०—अथ थान्ताः षट् सेटश्च। कौशिकस्तु विथुर इति सिद्धये यातन इत्याह, तन्न व्यथेरेव श्वशुर० (उ० ४२६) इति निपातनात् सिद्धः, चादृ याचने, उपताप–उपघातः, अत्र याञ्चोपतापौ क्रियात्वादर्थौ, ऐश्वर्याशिषौ तु धर्ममात्रत्वाद् द्योत्ये। यद्वा गंडति श्वेतते प्रासादः घंटा ध्वनति संयुज्यते।

अस्ति समवैतीति द्रव्यगुणसंयोगसत्तासमवायानामिव सिद्धानामप्याख्यातवाच्यत्वेन साध्यतया प्रतीतेरनयोऽर्थत्वमप्यस्तु, यदाहुः–पूर्वापरीभूतं भावं आख्यातेन व्याचष्ट इति, अणोपदेशश्चायं यदाह–सर्वे णादयो णोपदेशाः नृति–नन्दि–नर्दि–नक्कि–नाटि–नाथृ–नाधृ–नृवर्जा इति तेनाहुः—अदुरु-

१. अस्याशिष्येवात्मनेपदं स्यात्। २. विथुरो राक्षस इत्यर्थः, व्यथधातोः किदुरप्रत्यये विथादेशे व्यथतेऽस्माज्जन इति व्युत्पत्त्या विथुर इति भवति। ३. यास्काचार्याः। ४. पातञ्जलभाष्ये पतञ्जलिः। ५. नाटीति पर्युदासाच्चौरादिकस्य नटण् अवस्यन्दने इत्यस्यैवाणोपदेशत्वं, न तु णट नृत्ताविति भौवादिकस्य ॥

षसर्गान्तो-णहिनुमीना- नेः (२।३।७७), इति णत्वाभावे प्रनाथते स्यात् । तालव्यादिः, शैथिल्यम्–अगाढता, कौटिल्यं–कुसृतिः बन्धश्च, श्लाघा–गुणारोपः ॥

६७४–६९४ दान्ताः—खिदुङ् श्वैत्ये, वदुङ् स्तुत्यभिवादनयोः, भदुङ् सुख–कल्याणयोः, मदुङ् स्तुति–मोद–मद–स्वप्न–गतिषु, स्पदुङ् किञ्चिच्चलने, क्लिदुङ् परिदेवने, मुदि हर्षे, ददि दाने, हर्दि पुरीषोत्सर्गे, ष्वदि स्वदि स्वादि आस्वादने, उर्दि मान–क्रीडनयोश्च कुर्दि गुर्दि गुदि क्रीडायाम्, षूदि क्षरणे, ह्रादि शब्दे, ह्लादैङ् सुखे च, पर्दि कुत्सिते शब्दे, स्कुदुङ् आप्रवणे ॥

अ०—अथ दान्ता एकविंशतिर्हर्दि वर्जाः सेटश्च । श्वैत्यं गुणक्रिया । स्तुतिर्गुणैः प्रशंसा, अभिवादनं–पादयोः प्रणिपातः, सुखं–सद्वेद्यकर्मोदयात् सुखानुभवनम्, कल्याणं–श्रेयः–प्रीताप्यन्ये, प्रीतिर्मोहनीयविपाकः, मोदो–हर्षः, स्वप्नेनालस्यमपि लक्ष्यते, मोद–मद–स्वप्नेष्वकर्मकोऽयं, स्तुतिगत्योः सकर्मकः, परिशोचनं, अकर्मकोऽयम्, आद्यः षोपदेशो नेतरौ, यत् स्मृतिः

---

१. अविद्यमानगुणसम्बन्धज्ञापनं श्लाघा । २. चलनं कम्पनम् । ३. स्वसत्त्वनिवृत्तिपूर्वकं परस्वत्वोत्पादनं दानम् । ४. आस्वादनं–अनुभवो रुचिश्च, अनुभवे सकर्मकः, रुचावकर्मकः । ५. मानं सुखं क्रीडायामकर्मकः । ६. परिदेवनमित्यस्यार्थः । ७. मुदि धातुरित्यर्थः ॥

स्वरदंत्यपराः षोपदेशाः, स्मि स्विदि स्वदि स्वंजि स्व-पयश्च सृपि सृजि सृ स्तृरूपाः सेक्-सृवर्जम्, आस्वादनं जिह्वया लेहः, चाद्-आस्वादने, गुर्दि स्थानेऽन्ये खुर्दि पेठुः, गुदि स्थाने गुधिमेके, क्षरणं-निरसनम्, अव्यक्ते शब्दे इत्यन्ये, अव्यक्तोऽपरिस्फुटवर्णः, पायु ध्वनौ वर्तते, अन्ये तु निःशब्द-मधोवातं पर्दनं मन्वाना अशब्द इत्याहुः, आप्रवणं-उत्प्लुत्य गमनम्, आस्कन्दनं वा उद्धरणमित्यन्ये ॥

६९५-७०२ धान्ताः—एधि वृद्धौ, स्पर्द्धि सङ्घर्षे, गाधृङ् प्रतिष्ठा-लिप्सा-ग्रन्थेषु, बाधृङ् रोटने, दधि धारणे, बधि बन्धने, नाधृङ्नाथृङ्वत् ॥

अ०—अथ धान्ताः सप्त सेटश्च । सङ्घर्षः-पराभिभवेच्छा, अकर्मकोऽयम्, प्रतिष्ठा-आस्पदम्, लब्धुमिच्छा-लिप्सा, ग्रन्थनं-ग्रन्थः, प्रतिष्ठायामकर्मकोऽयं लिप्सा-ग्रन्थयोः सकर्मकः, रोटनं-प्रतिघातः, दान इति कौशिकः, नाथृङ्वद् यं चतुर्ष्वर्थेषु वर्तते लाघवार्थं तु एवं निर्देशः ॥

७०३-७०४ नान्तौ द्वौ—पनि[१] स्तुतौ, मानि[२] पूजायाम् ॥

अ०—अथ नान्तौ द्वौ सेटौ च ॥

---

१. अस्य स्वार्थे आयप्रत्ययो भवति यथा पनायति ।
२. अस्य जिज्ञासायां सन्प्रत्ययो भवति यथा मीमांसते धर्मम् ।

७०५–७१८ पान्ताः—तिपृङ् ष्टिपृङ् ष्टेपृङ् क्षरणे, तेपृङ् कम्पने च, टुवेपृङ् केपृङ् गेपृङ् कपुङ् चलने, ग्लेपृङ् दैन्ये च, मेपृङ् रेपृङ् लेपृङ् गतौ, त्रपौषि लज्जायाम्, गुंपि गोपन-कुत्सनयोः ॥

अ०—अथ पान्ताश्चतुर्दश सेटश्च । चात् क्षरणे, द्विद थ्वर्थः, केपृङ् गेपृङ् द्वयं गतावपि, चाच्चलने, गतावप्यन्ये गतिर्देशान्तरप्राप्तिः, तत्रैव स्थितस्य–स्पन्दनं चलनमिति पृथगेषां पाठः, षिदङर्थः ॥

७१९–७२३ बान्ताः—अबुङ् रबुङ् शब्दे, लबुङ् अवस्रंसने च, कबृङ् वर्णे, क्लीबृङ् अधार्ष्ट्ये, क्षीबृङ् मदे ॥

अ०—अथबान्ताः षट् सेटश्च । चाच्छब्दे, वर्णो–वर्णनं शुक्लादिश्च, एते कबृङादयो यद्यपि दन्त्यौष्ठ्यान्ताः काव्यादिशब्देषु श्रूयन्ते तथापि वृद्धैरौष्ठ्यान्तमध्ये पठितत्वादस्माभिस्तत्रैव पठिताः ॥

७२४–७४० मान्ताः—शीभृङ् चीभृङ् शल्भि कत्थने, वल्भि भोजने, गल्भि धार्ष्ट्ये, रेभृङ् अभुङ् रभुङ् लभुङ् शब्दे, ष्टभुङ् स्कभुङ् ष्टुभूङ् स्तम्भे, जभुङ् जभैङ् जृभुङ् गात्रविनामे, रभिं राभस्ये, डुलभिंष् प्राप्तौ ॥

१. अस्य निन्दार्थे सनि जुगुप्सते अनुबन्धस्यार्थविशेषे चरितार्थत्वाभावात् सान्तादात्मनेपदम् ॥

अ०—अथ भान्ताः सप्तदश रभिं लभिं वर्जाः सेटश्च। ठपरः षकारोऽयमित्येके, स्तम्भः-क्रियानिरोधः, रामस्यं कार्योद्यमः, ङित् त्रिमकर्थः, षिदङर्थः ॥

७४१-७४३ मान्ताः—भामि क्रोधे, क्षमौषि सहने, कमूङ् कान्तौ ॥

अ०—अथ मान्तास्त्रयः सेटश्च, कान्तिरभिलाषः ॥

७४४-७६० यान्ताः—अयि वयि पयि मयि नयि चयि रयि गतौ, तयि णयि रक्षणे च, दयि दान-गति-हिंसा-ऽदानेषु च, ऊयैङ् तन्तुसन्ताने, पूयैङ् दुर्गन्ध-विशरणयोः, क्नूयैङ् शब्द-उन्दनयोः, क्ष्मायैङ् विधूनने, स्फायैङ् ओप्यायैङ् वृद्धौ, तायृङ् सन्तान-पालनयोः ॥

अ०—अथ यान्ताः सप्तदश सेटश्च। चाद् रक्षणे, उन्दनं-क्लेदनं, दुर्गन्धेऽपीत्यन्ये, ओदित् सूयत्याद्योदितः (४।२।७०), इति क्तयोर्नत्वार्थम्, सन्तानः-प्रबन्धः ॥

७६१-७६९ लकारान्ताः—वलि वल्लि संवरणे, शलि चलने च, मलि मल्लि धारणे, भलि भल्लि परिभाषण-हिंसा-दानेषु, कलि शब्द-सङ्ख्यानयोः, कल्लि अशब्दे ॥

अ०—अथ लकारान्ता नव सेटश्च। दन्त्यौष्ठ्यादिरयं ज्वलादौ बल प्राणनधान्यावरोधयोरिति त्वोष्ठ्यादिः, घटा-

१. अपराधे सत्यपि कोपानाविष्करणं सहनम् ॥

दिश्चेत्येके, ताल्व्यादिः, चात् संवरणे, चुरादेराकृतिगणत्वाच्चुरादावदन्तोऽपि, शब्दस्याभावोऽशब्दस्तुष्णीम्भावः, [ इतियावत् ] शब्दार्थोऽयमित्येकेऽव्यक्तशब्दार्थ इत्यपरे ॥

७७०–७८३ वान्ताः—तेवृङ् देवृङ् देवने, षेवृङ् सेवृङ् केवृङ् खेवृङ् गेवृङ् ग्लेवृङ् पेवृङ् प्लेवृङ् मेवृङ् म्लेवृङ् सेवने, रेवृङ् पविगतौ ॥

अ०—अथ वान्ताश्चतुर्दश सेटश्च । अंषोपदेशः, दशाप्यूदितः, रेवृङ् प्लुति गतावित्यन्ये, प्लुतिभिर्गतिः–प्लुतिगतिः ॥

७८४–७८५ शान्तौ काशृङ् दीप्तौ, क्लेशि विबाधने ॥

अ०—अथ शान्तौ द्वौ सेटौ च ॥

७८६–७९७ षान्ताः—भाषि च व्यक्तायां वाचि, ईषि गति–हिंसा–दर्शनेषु, गेषृङ् अन्विच्छायाम्, येषृङ् प्रयत्ने, जेषृङ् णेषृङ् एषृङ् ह्रेषृङ् गतौ, रेषृङ् हेषृङ् अव्यक्ते शब्दे, पर्षि स्नेहने, घुषुङ् कान्तिकरणे ॥

अ०—अथ षान्ता द्वादश सेटश्च । प्रकृतेः परश्चकारः प्रकृतिमनुकर्षति तेन क्लेशिर्भाषिश्चाव्यक्तायां वाचि, अन्विच्छा–अन्वेषणम् ॥

१. देवनं–क्रीडा । २. खेवृधातुरित्यर्थः । ३. चकारो यस्मात्परस्तत्सजातीयमेव समुच्चिनोति–इति न्यायसंग्रहे ॥

७९८–८१० सान्ताः—स्रंसूङ् प्रमादे, कासृङ् शब्दकुत्सायाम्, भासि टुभ्रासि टुभ्लासृङ् दीप्तौ, रासृङ् णासृङ् शब्दे, णसि कौटिल्ये, भ्यसि भये, आङ् शासूङ् इच्छायाम्, ग्रसूङ् ग्लसूङ् अदने, घसुङ् करणे ॥

अ०—अथ मान्तास्त्रयोदश सेटश्च। दन्त्यादिः प्रमादोऽवलेपः, भान्तोऽयमित्येके, शब्दस्य कुत्सारोपः, टुभ्रासृ टुभ्लासृङौ द्वितावथ्यर्थौ, आङ् इति आङ्पर एवायं प्रयुज्यते नान्योपसर्गान्नापि केवल इति ज्ञापनार्थम्, मूर्धन्यान्तोऽयमिति चन्द्रः ॥

८११–८२८ हान्ताः—ईहि चेष्टायाम्, अहुङ् प्लिहि गतौ, गर्हि गल्हि कुत्सने, वर्हि वल्हि प्राधान्ये, बर्हि बल्हि परिभाषण–हिंसा–च्छादनेषु, वेहृङ् जेहृङ् वाहृङ् प्रयत्ने, द्राहृङ् निक्षेपे, ऊहि तर्के, गाहौङ् विलोडने, ग्लाहौङ् ग्रहणे, बहुङ् महुङ् वृद्धौ ॥

अ०—अथ हान्ता अष्टादश सेटश्च। दानेऽप्यन्ये. ओष्ठ्यादी एतौ, पूर्वौ तु दन्त्यौष्ठ्यादी, निद्राक्षेपे इत्यन्ये, तर्क उत्प्रेक्षा, विलोडनं–परिमलनम्, गृहौङ् इत्येके ॥

८२९–८३६ क्षान्ताः—दक्षि शैघ्र्ये च, धुक्षि धिक्षि सन्दीपन–क्लेशन–जीवनेषु, वृक्षि वरणे, शिक्षि विद्योपादाने,

भिक्षि याञ्चायाम्, दीक्षि मौण्ड्य-इज्या-उपनयन-नियम-व्रतादेशेषु, ईक्षि दर्शने ॥

## आत्मनेभाषाः

अ०—अथ क्षान्ता अष्टौ सेटश्च । एतेषां च षान्ते पाठो युक्तो वैचित्र्यार्थं त्विह कृतः, शैघ्र्यं-शीघ्रता चकाराद् वृद्धौ, केचिदलाभे लाभे चेत्याहुः, मौण्ड्यं-वपनम्, इज्या-यजनम्, उपनयनं-मौजीबन्धः, नियमः-संयमः, व्रतादेशः-संस्कारादेशः॥

इति आत्मनेपदावचूर्णिः समाप्ता ।

## अथोभयपदिनः ।

अथ उभयपदिनो म्लक्षीपर्यन्ता वर्णक्रमेण [ वक्ष्यन्ते ]

८३७ इदन्तः—श्रिग् सेवायाम् ।

८३८ ईदन्तः—णींग् प्रापणे ।

८३९–८४२ ऋदन्ताः—हृंग् हरणे, भृंग् भरणे, धृंग् धारणे, डुकृंग् करणे ॥

अ०—अथेदन्त एकः । अथ ईदन्त एकः । अथ ऋदन्ताश्चत्वारोऽनिटश्च हरतिरयं सकर्मकोऽकर्मकश्च तथाऽभ्यवहार्थश्च दृश्यते । चुरादेराकृतिगणत्वाद् धारयति । डित्रिमकर्थः, तनादिषु पाठमकृत्वाऽस्यात्र पाठः तन्भ्यो वा तथासि न्णोश्च ( ४।३।६८ ), इति सिजोलुग्विकल्पाभावार्थः शवर्थश्च ॥

८४३ कान्तः—ढ्की अव्यक्ते शब्दे ॥

अ०—अथ कान्त एकः सेट् ॥

८४४–८४६ चान्ताः—अञ्चूग् गतौ च, डुयाचृंग् याञ्चायाम्, डुपचींष् पाके ॥

१. तेन करति करत इत्यादि रूपम् । २. अत्र गकारो डुपचींष् इत्यत्रेकारश्चोभयपदार्थः ॥

अ०—अथ चान्तास्त्रयोऽनिटः, चाद्–अव्यक्ते शब्दे, गति–पूजनयोरयं परस्मैपदिषु पठितः, स चात्र फलवत् कर्तर्यपि परस्मैपदार्थः । अचुग् गतावित्यन्ये । ङिद् अनुबन्धस्त्रिमकर्थ एवमग्रेतनेऽपि, षिद्ङर्थः ॥

८४७-८५० जान्ताः—राजृग्–टुभ्राजृग् दीप्तौ, भजीं सेवायाम्, रञ्जीं रागे ॥

अ०-अथ जान्ताश्चत्वारो द्वौ सेटौ द्वावनिटौ । द्विद्ध्वर्थः, भ्राजेरात्मनेपदिनोऽपि पुनरिह पाठो राजृसाहचर्यदर्शनार्थः । तेन यजसृजमृजराजभ्राजभ्रस्जव्रश्चपरिव्राजः शः षः ( २।१।८७ ), इत्यत्रास्यैव ग्रहणात् षत्वे यङ्लुपि बाभ्राष्टि पूर्वस्य धातोः कत्वे बाभ्राक्तीतिरूपम्, यद्येवं षत्वमेव कल्प्यतां किं पुनः पाठेन ? सत्यं अस्यात्मनेपदाव्यभिचारोपदर्शनद्वारेणान्येषां यथादर्शनमात्मनेपदानित्य( त्व )ज्ञापनार्थं पुनः पाठः, तेन लभते, लभति, सेवते, सेवति–इत्यादयः प्रयोगाः माधव इति ॥

८५१ टान्तः—रेटृग् परिभाषण–याचनयोः ॥

अ०—अथ टान्तः ( एकः ) सेट् च ॥

८५२ णान्तः—वेणृग् गति–ज्ञान–चिन्ता–निशामन–वादित्रग्रहणेषु ॥

अ०—अथ णान्तः सेट्, वादित्रस्य–वाद्यभाण्डस्य वाद्-नाय ग्रहणम्[ वादित्रग्रहणम् ] ॥

८५३ तान्तः—चतेग् याचने ।

अ०:—अथ तान्तः सेट् ॥

८५४–८५६ थान्ताः—प्रोथृग् पर्याप्तौ, मिथृग् मेधा-हिंसयोः, मेथृग् सङ्गमे च ॥

अ०—अथ थान्तास्त्रयः सेटश्च, पर्याप्तिः-पूर्णता, चान्मेधा–हिंसयोः ॥

८५७–८६१ दान्ताः—ऊबुन्दृग् निशामने, णिदृग् णेदृग् कुत्सा-संनिकर्षयोः, मिदृग् मेदृग् मेधा–हिंसयोः ॥

अ०—अथ दान्ताः षट् सेटश्च । निशामनं–आलोचनम्, ऊदित् क्त्वादाविड् विकल्पार्थो घान्तोऽयमिति नन्दी ॥

८६२–८६५ धान्ताः—मेधृग् सङ्गमे च, श्रृधृग् मृधृग् उन्दे, बुधृग् बोधने ॥

अ०—अथ धान्ताश्चत्वारः सेटश्च, चान्मेधा–हिंसयोः, उन्दः–क्लेदनम्, शृधृग् तालव्यादिः, नायमृदित्येके ॥

८६६–८६८ नान्ताः—खनूग् अवदारणे, दानी अवखण्डने, शानी तेजने ॥

१. आर्जवार्थे तु शानूदान्मानूवधाभिशानार्जवे०

अ०—अथ नान्तास्त्रयः सेटश्च ॥

८६९-पान्तः—शपीं आक्रोशे ॥

अ०—अथ पान्तोऽनिट् च,आक्रोशो-विरुद्धानुध्यानम् ॥

८७०-८७१ यान्तौ—चायृग् पूजा-निशामनयोः, व्ययी गतौ ॥

अ०—अथ यान्तौ द्वौ सेटौ च ।

८७२-लान्तः—अलीं भूषण-पर्याप्ति-वारणेषु ॥

अ०—अथ लान्त एकः सेट् च । अलीत्येनं परस्मैपदिनमन्ये मन्यन्ते ॥

८७३-८७४ वान्तौ धावूग् गति-शब्दयोः,चीवृग् ऋषीवत् ॥

अ०—अथ वान्तौ द्वौ सेटौ च, ऋषी आदानसंवरणयोर्वक्ष्यते तद्वदयमप्यादान-संवरणयोरित्यर्थः ॥

८७५-शान्तः—दाशृग् दाने ॥

अ०—अथ शान्त एकः सेट् च ॥

---

(३।४।७), इति स्वार्थे सनि दीदांसति,निशानार्थे शानधातोः स्वार्थे सनि शीशांसतीति रूपं बोध्यम् । २. अनेकार्थत्वादुपलम्भनेऽप्य तः शप उपलम्भने (३।३।३५), इत्यनेन अस्यात्मनेपदे शपते चैत्रायेति प्रयोगः, चैत्रं कश्चिदर्थं बोधयतीत्यर्थः ॥

८७६-८८४ षान्ताः-ऋषी आदान-संवरणयोः, भेषृग् भये, भ्रेषृग् चलने च, पषी बाधन-स्पर्शनयोः, लषी कान्तौ, चषी भक्षणे, छषी हिंसायाम्, त्विषीं दीप्तौ, अषी [ गत्यादानयोः ]

अ०—अथ षान्ता नव, त्विषीं वर्जाः सेटश्च, चकाराद् भये, स्पर्शनं-ग्रन्थनम्, अयं स्पर्श इत्येके, कान्तिरिच्छा, अव-पूर्वो दान-निरसनयोश्चेत्येके निरसनमपाकरणम्, अवत्वेषते-अवत्वेषति, ददाति-निरस्यति-दीप्यते चेत्यर्थः ॥

८८५-८८६ सान्तौ असी गत्यादानयोश्च, दासृग् दाने ॥

अ०—अथ सान्तौ द्वौ सेटौ च, चकाराद् दीप्तौ ॥

८८७-८८८ हान्तौ—माहृग् माने, गुहौग् संवरणे ॥

अ०—अथ हान्तौ द्वौ सेटौ च, मानं-वर्त्तनम् ॥

८८९-क्षान्तः—म्लक्षी भक्षणे ॥

अ०—अथ क्षान्तः सेट् च, अयं भक्षीत्यन्ये ॥

इत्युभयपदिनः

## द्युतादिगणः ।

अथ द्युतादयः कृपौङ् पर्यन्ता आत्मनेपदिनः सेटश्च वर्णक्रमेण [ वक्ष्यन्ते ]

८९०-९०७ द्युति दीप्तौ, चान्तः—रुचि अभिप्रीत्यां च, टान्ता—घुटि परिवर्तने[1], रुटि लुटि [ प्रतिघाते ] ठान्तः—लुठि प्रतिघाते, तान्तः—श्विताङ् वर्णे, दान्ता—ञिमिदाङ् स्नेहने, ञिश्विदाङ्—ञिष्विदाङ् मोचने च, भान्ताः—शुभि दीप्तौ, क्षुभि संचलने, णभि तुभि हिंमायाम्, सम्भूङ् विश्वासे शान्त—भ्रंशूङ् [ अवस्रंमने ], मान्तौ स्रन्सृङ् अवस्रंमने, ध्वन्सृङ् गतौ च ॥

अ०—पूर्वाचार्यानुवर्तनेन द्युतेः पूर्वं पाठः । अथ चान्त एकः सेट्, चकाराद् दीप्तौ[2], अभिप्रीतिरभिलाषः, अथ टान्तास्त्रयः सेटश्च, आद्यो दीप्तावित्यन्ये, अथ ठान्त एकः सेट्, अथ तान्त एकः सेट्, अथ दान्तास्त्रयः, स्नेहनं-स्नेहप्रयोगः, ञ्यनुबन्धो ज्ञानेच्छार्चार्थञीच्छील्यादिभ्यः क्तः (७।२। ९२), इति वर्त्तमानेक्तार्थः, ञिमिदादयस्त्रयोऽप्यादितः, ञीतो वर्तमानेक्तार्थवचनम्, चकारात् स्नेहने, ञिश्विदा

१. परिवर्तनमितस्ततो भ्रमणम् । २. रोचते सूर्यः–दीप्यत इत्यर्थः, मैत्राय रोचते दधि, मैत्रो दधि अभिलपतीत्यर्थः ॥

ङिति डान्त इत्येके, अथ भान्ताः पञ्च सेटश्च, संचलनं–रूपान्यथात्वम्, अणोपदेशोऽयमित्येके, दन्त्यादि:, हान्तोऽयमिति कौशिकः, अथ शान्त एकः, अथ सान्तौ द्वौ चकाराद् अवस्रंसने इति ॥

अथ द्युताद्यन्तर्गतो वृतादिपञ्चकस्तत्र

९०८-९१२ तान्तः—वृतु वर्तने । दान्तः—स्यन्दूङ् स्रवणे । धान्तौ—वृधूङ् वृद्धौ, शृधूङ् शब्दकुत्सायाम् । पान्तः—कृपौङ् सामर्थ्ये ।

इति वृत् द्युतादय आत्मनेभाषाः ।

अ०—तान्त एकः, वर्तनं-स्थितिः, दान्त एकः, अथ धान्तौ द्वौ शृधूङ्तालव्यादिः शब्दकुत्सा–पायुशब्दत्वात्, अथ पान्त एकः, वृत्द्युतादिर्वृतादिश्चान्तर्गणौ वर्त्तितौ–समाप्तावित्यर्थः, वृधेःक्विपि वृत् वर्धितौ पूर्णावित्येके ॥

॥ इति द्युतादिः ॥

## अथ ज्वलादयो यजादेः प्राक् षट्त्रिंशत्

९१३. ज्वल दीप्तौ ।

अ०—षद्लृ शद्लृ क्रुश रुह रमिवर्जाः सेटश्च । वर्णक्रमेण निदर्श्यन्ते, तत्रापि पूर्वाचार्यानुरोधेन पूर्वं ज्वलदीप्तौ ।

९१४–९४१ चान्तः—कुच संपर्चन-कौटिल्य-प्रतिष्टम्भ-विलेखनेषु । तान्तः—पत्लृ [ गतौ ], थान्ताः–पथे गतौ, क्वथे निष्पाके, मथे विलोडने । दान्तौ—षद्लृ विशरण-गति-अवसादनेषु, शद्लृ शातने । धान्तः—बुध अवगमने । मान्तौ टुवमू उद्गिरणे, भ्रमू चलने । रान्तः—क्षर मञ्चलने । लान्ताः—चल कम्पने, जल घात्ये, टल ट्वल वैक्लव्ये, ष्ठल स्थाने, हल विलेखने, णल गन्धे, बल प्राणन-धान्यावरोधयोः, पुल महत्वे, कुल बन्धु-संस्त्यानयोः, पल फल शल गतौ, हुल हिंसा-संवरणयोश्च । शान्तः—क्रुश आह्वान-रोदनयोः । सान्तः—कस गतौ । हान्तः—रुह जन्मनि ॥ परस्मैभाषा ॥

अ०—चान्त एकः, संपर्चनं-मिश्रता, प्रतिष्टम्भो-रोधनम्, विलेखनं-कर्षणम्, अथ तान्त एकः, अथ थान्तास्त्रयः सेटश्च, अथ दान्तौ, विशरणं-शटनम्, अवसादोऽनुत्साहः, शातनं-तनूकरणम्, अथ धान्त एकः, अवगमनं-ज्ञापनम्, अथ मान्तौ द्वौ, द्विट् अध्वर्थः, नायमित्येके उद्गिरणं-भुक्त-

स्योर्ध्वगतिः, अथ रान्त एकः, सकर्मचायमकर्मा च क्षरति गौः पयो मुञ्चतीत्यर्थः, क्षरति जलं स्रवतीत्यर्थः, अथ लान्ताश्चतुर्दश सेटश्च, घात्यं–जडत्वम्, अत्यैक्ष्ण्यमित्यर्थः, विक्लव एव वैक्लव्यम्, अंशोपदेशोऽयमित्यन्ये, विलेखनं–कर्षणम्, गन्धोऽर्दनम्, प्राणनं–जीवनम्, धान्यमवरुध्यते यत्र इति धान्यावरोधः–कुसूलः, ओष्ट्यादिर्घटादिरयमित्येके। अयं तुदादिरपीत्येके, संस्त्यानं–सङ्घातः, फलिशलयोः पूर्वमधीतयोरिह पाठो ज्वलादिपाठार्थः शलेः परस्मैपदार्थश्च, चादृगतौ, अथ शान्त एकः, अथ सान्त एकः, अथ हान्त एकः, बीजजन्मनीत्येके, बीजजन्माङ्कुरोत्पत्तिरिति ॥

परस्मैपदिनः ॥

९४२–९४३ मान्तः—रमिं क्रीडायाम् । हान्तः–षहि मर्षणे । आत्मनेभाषौ वृत् ज्वलादि च ॥

अ०—अथ मान्त एको यमूं उपरमे । रमू क्रीडायामित्यूदितो ज्वलादावधीयन्ते केचित् । अथ हान्त एको मर्षणं–क्षमेति ॥

ज्वलादयो वृत्ताः समाप्ता इत्यर्थः ॥

१. छलधातुरित्यर्थः ।

अथ यजादयो नव श्वि वदवर्जा अनिटश्च वर्णक्रमेण वक्ष्यन्ते ।

९४४ यजीं देवपूजासंगतिकरणदानेषु ॥

९४५-९४७ एदन्ताः—वेंग् तन्तुसन्ताने, व्येंग् संवरणे, ह्वेंग् स्पर्धाशब्दयोः ॥

अ०—अथ एदन्तास्त्रयोऽनिटश्च, संवरणं–आच्छादनम् ॥

९४८ पान्तः—डुवपीं बीजसन्ताने ॥

९४९ हान्तः–वहीं प्रापणे ।

॥ उभयतो भाषा ॥

अ०–पान्त एकः ड्वित् त्रिमकर्थः, बीजानां तन्तुसंतानः क्षेत्रे विस्तारणम्, अथ हान्त एक इति ॥

## उभयपादिनः ॥

९५० इदन्तः—टुओश्वि गति-वृद्ध्योः ।

अ०—अथ इदन्त एकः ट्विदथ्वर्थः, ओदित् सूयत्याद्योदितः ( ४ । २ । ७० ), इति क्तयोर्नार्थः ॥

९५१ दान्तः—वद व्यक्तायां वाचि ॥

९५२ सान्तः—वसं निवासे ॥

परस्मैभाषा ।

इति वृत् यजादिः ॥

अ०—अथ दान्त एकः ।

अथ सान्त एको यजादयो वर्तिताः समापिता इत्यर्थ इति परस्मैपदिनः ॥

९५३–घटिष चेष्टायाम् ॥

अ०—अथ घटादयो वर्णक्रमेणाभ्वादिसमाप्तेर्वक्ष्यन्ते तत्र घटेः पूर्वाचार्यप्रसिद्धेः पूर्वं निर्देशः । इह घटादीनामेकार्थत्वेऽपि पठितार्थेष्वेव घटादिकार्यं विज्ञानं तेन उद्घाटयति-सारयति–छादयति–वालयति–इत्यादौ चेष्टाद्यर्थाभावे घटादेर्ह्रस्वो न भवति, अन्ये तु ये घटादयोऽन्यत्र पठितास्तेषां योऽर्थ उपात्तस्तत्रैव ह्रस्वादिकार्यं, ये तु अत्रैव पाठयन्ते तेषां सामान्येनानेकार्थत्वाद् इति ब्रुवते, षिद् अङर्थ एवमुत्तरेष्वपि ॥

१. विघटयतीत्यादि तु अच्प्रत्ययान्तस्य णिज्बहुलं नाम्नः कृगादिषु( ३। ४। ४२। ), इति करोत्यर्थे णिचि रूपं विज्ञेयम् ॥

९५४-९६५ जान्तः-ध्वंजुङ् गति-दानयोः । थान्तौ-व्यथिष् भयचलनयोः, प्रथिष् प्रख्याने । दान्ताः—म्रदिष् मर्दने, स्खदिष् स्खदने, कदुङ् क्रदुङ् क्लदुङ् वैक्लव्ये। पान्तः-कृपि कृपायाम् । रान्तः—ञित्वरिष् सम्भ्रमे । सान्तः-प्रसिष् विस्तारे । क्षान्तः—दक्षि हिंसागत्योः ॥

अ०—अथ थान्तौ द्वौ प्रख्यानं-प्रसिद्धिः। दान्ताः पञ्च सेटश्च स्खदनं-विदारणम्, विक्लवः कातरस्तस्य भावः कर्म वा वैक्लव्यं वैकल्य इति चन्द्रः। पान्त एकः सेट् च, रान्त एकः संभ्रमोऽत्राशुकारिता त्रीति ज्ञानेच्छा०। इति सत्यर्थे क्तार्थः, सान्त एकः प्रसवेत्यन्ये । क्षान्त एको दक्षि शैघ्र्ये चेत्यस्यैवार्थभेदाद् घटादिकार्यार्थमिह पाठ इति ।

## आत्मनेपदिनः ॥

९६६-९६९ आदन्तः—श्रां पाके । ऋदन्तः—स्मृं आध्याने । ॠदन्तौ-दॄ भये, नॄ नये ॥

अ०—अथादन्त एकः श्रैं पाके श्रांक् पाके इत्यस्य चेह घटादिकार्यार्थमिह पाठोऽत एव ज्ञापकादनेकार्थकत्वम् । ऋदन्त एक आध्यानमुत्कण्ठा । ॠदन्तौ द्वौ दॄश् विदारणे

१. अक्षाञ्जि, अक्षञ्जि-इत्यादौ क्षञ्जि दक्ष्यादीनां घटादिपाठबलाद्-अनुपान्त्यस्यापि वा दीर्घः । २ दुःखेऽपि-इत्यन्ये ॥

इत्यस्यैव घटादिकार्यार्थमिह पाठः, एवमन्येषामप्युत्तराणां घटादिकार्यार्थमिह पाठो ज्ञेयः ॥

९७०–१०११ कान्ताः–ष्टक स्तक प्रतीघाते, चक तृप्तौ च. अक कुटिलायां गतौ च। खान्तः—कखे हसने। गान्ताः– अग अँकवत्, रगे शङ्कायाम्, लगे सङ्गे, ह्रगे ह्लगे षगे सगे ष्टगे स्थगे संवरणे। टान्ताः—वट भट परिभाषणे[४], णटनतौ। डान्ताः—गड सेचने, हेडृ वेष्टने, लड जिह्वोन्मथने। णान्ताः—फण कण रण गतौ, चण हिंसादानयोश्च, शण श्रण दाने। थान्ताः—स्नथ क्नथ क्लथ क्रँथ हिंसार्थाः। दान्तौ छद् उर्जने, मदै हर्षग्लपनयोः। नान्ताः—ष्टन स्तन ध्वन शब्दे, स्वन अवतंसने, चन हिंसायाम्। रान्तः—

१. घटादित्वान्नृणन्तं प्रयुङ्क्त इति नरयति, अन्यत्र नारयति। २. अयमात्मनेपद्यपि तेन चकते। ३ कुटिलायां गताविति अर्थः। ४ वेष्टने वाटयति भृतौ भाटयतीति रूपं परिभाषणभिन्नार्थे। ५. नतौ नटति तेन नृत्तौ नाटयति ह्रस्वाभावः। ६ हेडृङ् अनादरे इत्यस्यात्मनेपदिन उत्सृष्टानुबन्धस्यार्थविशेषे मित्त्वार्थमनुवाद आत्मनेपदिष्वनुक्त्वा परस्मैपदिषु पाठसामर्थ्यात् परस्मैपदं हेडति--अहिडी–अहीडी–इत्यादि रूपं भवति॥ ७. चौरस्योत्क्राथयती तु यौजादिकस्य घवन्ताद् वा णिच्, **जास–नाट–क्राथ–पिषो हिंसायाम् ( २।२।१४ )**, इति निर्देशाद् वा ह्रस्वाभावः॥

ज्वर रोगे । लान्ताः—चल कम्पने, ह्वल ह्मल चलने, ज्वल दीप्तौ च ।

## वृत् घटादिः परस्मैभाषा ॥

वृत्घटादिः, इत्याचार्यश्रीहैमचन्द्रानु० भ्वादयो निरनुबन्धाः

अ०—अथ कान्ताश्चत्वारः सेटश्च, चात् प्रतीघाते, अकुटिलायां गतौ पठितोऽयमपि लाघवार्थं तद्वत् पठितः, खान्त एकः, गान्ता नव संवरणं–आच्छादनम्, टान्तास्त्रयः सेटश्च, डान्तास्त्रयो जिह्वया–उन्मथनं जिह्वोन्मथनम्, जिह्वोन्मथयोः केचित् तन्मतमङ्ग्रहार्थं जिह्वा च जिह्वाविषया क्रिया च जिह्वोन्मथनं चेति समाहारः, णान्ताः षड् गतौ घटादित्वाण्णौ फणयति, अन्यत्र फाणयति–घटं निःस्नेहयति=इत्यर्थः, फणि रणी पूर्वपठितावेव घटाद्यर्थं पुनः पठितौ चाद्वतौ. थान्ताश्चत्वारः, दान्तौ द्वौ उर्जनं प्राणनं बलं च छदण् संवरण इति चूरादौ पठिष्यमानोऽप्युर्जने घटादिकार्यार्थमिहाधीतः, मदैच् हर्षइत्ययमनयोरर्थयोघटादिकार्यार्थमिहाधीतः नान्ताःपञ्च, अन्त्यौ पूर्वपठितावपि अर्थविशेषे घटादिकार्यार्थमीहाधीतौ शब्देऽपि स्वानयती त्यन्ये, अथ रान्त एकः सेट्, लान्ताश्चत्वारः सेटः चाचलनं ज्वलादावधीतोऽप्यर्थविशेषे घटादिकार्यार्थमिहाधीतः, केचित्तु दलि–वलि–स्खलि [ क्षपि ] त्रपीणामपि घटा-

१. चलधातोरपि ज्वलवत् कार्यं भावनीयम् । २. तन्मते दलयति वलयति स्खलयति क्षपयति त्रपयतीत्यपि भवति ॥

दित्वमिच्छन्ति इति परस्मैपदिन इत्यादिभ्वादयो निरनुबन्धा धातवः ।

भ्वादि धातवः समाप्ताः ॥

## अथ अदादौ परस्मैपदिनो धातवः ॥

१–१५ अदं प्सांक् भक्षणे, भांक् दीप्तौ, यांक् प्रापणे, वांक् गति–गन्धनयोः, ष्णांक् शौचे, श्रांक् पाके, द्रांक् कुत्सितगतौ, पांक् रक्षणे, लांक् आदाने, रांक्[1] दाने, दांक्[2] लवने, [3]ख्यांक् प्रकथने, प्रांक् पूरणे, मांक् माने ॥

अ०—कित्करणं अदादिज्ञापनार्थं एवं सर्वत्र, आदन्ताश्चतुर्दश श्राति पच्यते स्वयमेवेत्यर्थः, कुत्सिता गतिः––पलायनं स्वप्नश्च, बकारो अबौ दाधौ दा ( ३।३।५ ), इत्यत्र विशेषणार्थः प्रकटन इत्यन्ये, मानं–वर्त्तनम् ॥

१६–१८ इदन्तौ—इंक् स्मरणे, इंण्क् गतौ । ईदन्तो वींक् प्रजन–कान्ति–असन–खादने च ॥

---

१. आदानेऽपीति कश्चित् । २. बित्त्वान्न दासंज्ञा अबौ दाधौ दा (३।३।५), इति सूत्रेण । ३. अयं चतुर्ष्वेव लकारेषु प्रयुज्यत इतिकेचित् ॥

अ०—इदन्तौ द्वौ अनिटौ च कित्करणं इको वा (४।३।१६), इत्यादौ विशेषणार्थं गणज्ञापनार्थं च, इङ्-इकावधिनैव प्रयुज्येते, णिच्वं इणः (२।१।५१), इत्यादौ विशेषणार्थम् ॥ ईदन्त एकोऽनिट् च, चाद् गतौ प्रजनः-प्रथमगर्भग्रहणम्, असनं-क्षेपः, अशनं तृप्तिरित्येके ॥

१९-३७ उदन्ता द्युंक् अभिगमे, षुंक् प्रसवैश्वर्ययोः, तुंक् वृत्ति-हिंसा-पूरणेषु, युक् मिश्रणे, णुक् स्तुतौ, क्ष्णुक् तेजने, स्नुक् प्रस्रवणे, टुक्षु रु कुंक् शब्दे, रुदृक् अश्रुविमोचने, ञिष्वपंक् शये, अन् श्वसक् प्राणने, जक्षक् भक्ष-हसनयोः, दरिद्राक् दुर्गतौ, जागृक् निद्राक्षये, चकासृक् दीप्तौ, शासूक् अनुशिष्टौ ॥

अ०–अथ उदन्ता दश, षोपदेशोऽयमित्येके, अयुतसिद्धानामित्यादिदर्शनादमिश्रणेयुरित्यन्ये। प्रस्रवनं-क्षरणम्, ट्वित्त्वमथ्वर्थम्, कुंङ् कुंक् कुंङ्त् इत्येषां शब्दार्थत्वेऽपि कवत इति व्यक्ते शब्दे कौतीति शब्दमात्रे कुवत इत्यार्त्तस्वरे, अथ[अदाद्य] अन्तर्गणो रुदादिपञ्चको जीत्त्वं (ज्ञानेच्छा० ५।२।९२), इति मत्यर्थे क्तार्थम्, प्राणनं-जीवनम्, रुद् पञ्चकस्यायं पञ्चमो

१. अकर्मकोऽयम्। २. स्नुक् धातुः। ३. अयूतेत्यत्र युतशब्दस्य पृथक्त्ववाचित्वेन दृष्टत्वादितिभावः। ४ भ्वादिरयं धातुः। ५ अदादिरयम्। ६. तुदादिरयम्॥ ७. जक्षधातुः।

जक्षपञ्चकस्याद्य उभयकार्यभाक्, अनुशिष्टि–नियोगः, रुत्–जक्षपञ्चके समाप्य प्रकृतो वर्णक्रमोऽनुश्रीयते ।

३८ चान्तः—वचंक् भाषणे ।

३९ जान्तः—मृजौक् शुद्धौ ।

४० तान्तः—सस्तुक् स्वप्ने ।

४१ दान्तः—विदक् ज्ञाने ।

४२ नान्तः—हनंक् हिंसा–गत्योः ।

४३ शान्तः—वशक् कान्तौ ।

४४–४५ मान्तौ—अमक्भुवि, षसक् स्वप्ने यङ्लुक् च परस्मै भाषा ॥

अ०—अथ चान्त एकः, जान्त एकः, तान्त एकः, दान्त एकः, नान्त एकः, शान्त एकः, कान्तिरिच्छा, वश घसी छान्दसावित्यन्ये, भाषायामपि प्रयोगदर्शनात्तूपात्तौ, सान्तौ द्वौ भवनं भूः सत्ता तस्यां सर्वे धातवो यङ्लुबन्ताः कित्करणाददादौ परस्मैपदिनश्च ।

अदादौ परस्मैपदिनो धातवः समाप्ताः ॥

१. रुत् पञ्चकाच्छिदयः ( ४।४।८८ ), इति सूत्रेणेट्, द्वयुक्तजक्षपञ्चतः ( ४।२।९३ ), इतिसूत्रेण अनः पुस् च भवति ॥

४६ इदन्तः—इंङ्क् अध्ययने ।

४७ ईदन्तः—शीङ्क् स्वप्ने ।

४८ उदन्तः—ह्नुंङ्क् अपनयने ।

४९ ऊदन्तः— षूङौक् प्राणिगर्भविमोचने ।

अ०—अथ इदन्त एक इङिकोरधिनावश्यंभावीयोगः । ईदन्त एकः, उदन्त एकः, अपनयनमपलापः, ऊदन्त एकः ॥

५० चान्तः—पृचैङ्क् संपर्चने।

५१-५५ जान्ताः—पृजुङ्क् पिजुकि संपर्चने, वृजैकि वर्जने, णिजुकि विशुद्धौ, शिजुकि अव्यक्ते शब्दे ।

५६ डान्तः—ईडिक् स्तुतौ ।

५७ रान्तः—ईरिक् गति-कम्पनयोः ।

५८ शान्तः—ईशिक् ऐश्वर्ये ।

५९-६३ सान्ताः—वसिक् आच्छादने, आङः शासूकि इच्छायाम्, आसिक् उपवेशने, कसुकि गति-शातनयोः, णिसुकि चुम्बने ।

६४ क्षान्तः—चक्षिक् व्यक्तायां वाचि ।

## आत्मने भाषाः

अ०—अथ चान्त एकः, जान्ताः पञ्च सेटश्च, संपर्चनं-

मिश्रणं तौलव्यादिः, डान्त एकः, रान्त एकः, शान्त एकः, सान्ताः पञ्च, आङ इति आङ्पूर्व एवायं प्रयोज्यो न केवलो नाप्यन्योपसर्गपूर्व इत्येवमर्थम्, क्षान्त एकः ।

इत्यात्मनेपदिनः ॥

६५-६६ उदन्तौ—उर्णुग्क् आच्छादने, ष्णुंग्क् स्तुतौ ॥

६७ ऊदन्तः—ब्रूंग्क् व्यक्तायां वाचि ।

६८ षान्तः—द्विषींक् अप्रीतौ ।

६९-७१ हान्ताः—दुहींक् क्षरणे, दिहींक् लेपे, लिहींक् आस्वादने ।

## उभयतो भाषाः ॥

अ०—अथ उदन्तौ द्वौ, ऊदन्त एकः, षान्त एकः, हान्तास्त्रयः ।

इत्युभयतो भाषाः ॥

## अथ अदाद्यन्तर्गणो ह्वादयः

७२ हुंक् दानादनयोः ।

अ०—दानमत्र हविः प्रक्षेपः, अदनं-भक्षणम्, ककारोऽदादित्वज्ञापनार्थः ।

१. शिजुकिधातुः ।

७३–आदन्तः—ओहांक् त्यागे ।

७४–७५ ईदन्तौ—ञिभींक् भये, ह्रींक् लज्जायाम् ।

७६–७७ ऋदन्तौ—पृंक् पालनपूरणयोः, ऋंक् गतौ। परस्मैभाषा ।

अ०—अथ आदन्त एकः, ईदन्तौ द्वौ, ऋदन्तौ द्वौ ।

इति परस्मैपदिनः ॥

७८–७९ आदन्तौ—ओहांङ्क् गतौ, माङ्क् मान–शब्दयोः ।

अ०—अथ आदन्तो द्वौ ।

आत्मनेपदभाषाः ॥

८०-८१ आदन्तौ—डुदांग्क् दाने, डुधांग्क् धारणे च।

८२–ऋदन्तः—डुडुभृंग्क् पोषणे च ।

८३–८४ जान्तौ—णिजृंकी शौचे च, विजृंकी पृथग्भावे ।

८५ षान्तः—विष्लृंकी व्याप्तौ ।

उभयतो भाषा ॥

वृत्ह्रादिः कितोऽदादयः ॥

अ०—अथादन्तौ द्वौ, डुनुबन्धस्त्रिमगर्भः, चकाराद्

दाने, ऋदन्त एकः चकाराद् धारणे, जान्तौ द्वौ, चान्तोऽयमिति [ सभ्याः ], षान्त एककुः, उभयपदिन इत्यादयोऽदादयः किंतो धातवः ।

अदादयो धातवः समाप्ता. ॥

## अथ दिवादयो धातवः ।

१ दिवूच् क्रीडा–जय–इच्छा–पणि–द्युति–स्तुतिगतिषु ॥

अ०—अथ श्य विकरणा दिवादयो वर्णक्रमेण निर्दिश्यन्ते, तत्रापि पूर्वाचार्यप्रसिद्धानुरोधेन दिवेरादौ पाठः, जयेच्छा–विजीगिषा, पणिर्व्यवहारः क्रियादिः, दिवादिज्ञापनार्थं चित्करणमेवं सर्वत्र ॥

२–३ ऋदन्तौ—जॄष् झॄष् च जरसि ।

४–७ ओदन्ताः—शोंच् तक्षणे, दों छोंच् छेदने, षोंच् अन्तकर्मणि ॥

अ०—अथ ऋदन्तौ द्वौ जरा–वयोहानिः, षितोऽङर्थं, अन्त्यो षिद् इत्येके, ओदन्ताश्चत्वारस्तक्षणं–तनूकरणम्, अन्तकर्म–विनाशः ॥

८ डान्तः—व्रीड्च् लज्जायाम् ।

९ तान्तः—नृतैच् नर्त्तने।

१०-११ थान्तौ—कुथच् पूतिभावे, पुथच् हिंसायाम्।

१२-१४ धान्ता—गुधच् परिवेष्टने, राधंच् वृद्धौ, व्यधंच् ताडने ॥

१५-१६ पान्तौ—क्षिपंच् प्रेरणे, पुष्पच् विकसने ॥

१७-२० मान्ताः—तिम तीम ष्टिम ष्टीमच् आर्द्रभावे।

२१-२४ वान्ताः—षिवूच् उतौ, श्रिवूच् गतिशोषणयोः, ष्टिवू क्षिवूच् निरसने।

२५ षान्तः—इषच् गतौ।

२६-२९ सान्ताः—ष्णसूच् निरसने, कनसूच् ह्रुतिदीप्त्योः, त्रसैच् भये, प्युसच् दाहे ॥

३०-३१ हान्तौ—षह षुहच् शक्तौ ॥

अ०—अथ डान्त एकः, नर्त्तनं-नाट्यम्, थान्तौ द्वौ, पूतिभावो-दुर्गन्धयः, धान्तास्त्रयः स्वादिषु पठिष्यमाणस्याप्यस्येह पाठो वृद्धावेव श्यवि करणार्थः-राध्यति-वर्धत इत्यर्थः, वृद्धेरन्यत्र श्नुरेव राध्नोत्योदनं पचतीत्यर्थः, चूरादेराकृतिगणत्वाद् राधयति कश्चित्तु राध-माध संसिद्धाविति पठन् वृद्धेरन्यत्रापि राधेः श्यं साधिं च धात्वन्तरमिच्छति. पान्तौ द्वौ, मान्ताश्चत्वारः, वान्ताश्चत्वार उतिर्वानं-तन्तुसन्तानमि-

त्यर्थः, षान्त एकः, सान्ताश्चत्वारो ह्रुतिः-कौटिल्यम्, हान्तौ द्वौ षुह तृप्तावित्येके ॥

## पुषादि ।

### ३२ पुषंच् पुष्टौ

अ०—अथ दिवाद्यन्तर्गणः पुषादिः परस्मैपद्येव तत्रापि प्रसिद्धानुरोधाद् आदौ पुषं च पुष्टौ, अकर्मकोऽयम् ॥

३३ चान्तः—उचच् समवाये ।

३४ टान्तः—लुटच् विलोटने ।

३५-३८ दान्ताः—ष्विदांच् गात्रप्रक्षरणे, क्लिदौच् आर्द्रीभावे, ञिष्विदाच् स्नेहे, ञिक्ष्विदाच् मोचने च ।

अ०—चान्त एकः समवाय-ऐक्यम्, टान्त एकः, दान्ताश्चत्वारो गात्रप्रक्षरणं-घर्मस्रुतौ, ञित्वं ज्ञानेच्छा० ( ५।२।९२ ), इति सत्यर्थे क्तार्थमेवमुत्तरेऽपि, चात् स्नेहे ॥

३९-४४ धान्ताः—क्षुधंच् बुभुक्षायाम्, शुधंच् शौचे, क्रुधंच् कोपे, षिधूंच् संराद्धौ, गृधूच् अभिकाङ्क्षायाम्, रधौच् हिंसा संराद्ध्योः ॥

अ०—धान्ताः—शौचं-नैर्मल्यम्, संराद्धिः-निष्पत्तिः, संराद्धि-पाकः, रधौच् हिंसायाम् चेत्यकृत्वाऽस्यात्र निर्देशः संराद्धिं भेदज्ञापनार्थः ॥

४५-५३ पान्ताः-तृपौच् प्रीतौ, दृपौच् हर्षमोहनयोः, कुपच् क्रोधे, गुपच् व्याकुलत्वे, युप रूप लुपच् विमोहने, डिपच् क्षेपे, ष्टुपच् समुच्छ्राये ॥

अ०—अथ पान्ता नव प्रीतिः-सौहित्यम्, मोहनं-गर्वः ॥

५४-५७ भान्ताः—लुभच् गार्ध्ये, क्षुभच् संचलने, णभ तुभच् हिंसायाम् ॥

अ०-अथ भान्ताश्चत्वारः—गार्ध्यमभिकाङ्क्षा, संचलनं-रूपान्यथात्वं द्युतादिपठितेनैव अक्षुभदिति सिद्धं श्यविकरणार्थं तु दिवादावत्रश्यं पठितव्य इति पुष्यादावपि पठितः ॥

५८-६३ शान्ताः—नशौच् अदर्शने, कुशच् श्लेषणे, भृश भ्रंशूच् अधःपतने, वृशच् वरणे, कृशच् तनुत्वे ॥

अ०—अथ शान्ताः षड् अदर्शनमनुपलब्धिः ॥

६४-७२ षान्ताः—शुषंच् शोषणे, दुषंच् वैकृत्ये, श्लिषंच् आलिङ्गने, प्लुषूच् दाहे, जितृषच् पिपासायाम्, तुषं हृषच् तुष्टौ, रुषच् रोषे, प्युषच् [ विभागे ] ॥

अ०—अथ षान्ता नव-वैकृत्यं-रूपभङ्गः, तुष्टिः प्रीती-[तिः], उदिदयमिति नन्दि, अलीकार्थोऽयमित्येके ॥

७३-८५ सान्ताः—प्युस पुसच् विभागे, विसच्प्रेरणे, त्रुसच् श्लेषे, असूच् क्षेपणे, यसूच् प्रयत्ने, जसूच् मोक्षणे, तसू दसूच् उपक्षये, वसूच् स्तम्भे, बुसच् उत्सर्गे, मुसच् खण्डने, मसैच् परिणामे ॥

अ०—अथ सान्ताः त्रयोदश, उत्सर्गस्त्यागः, षान्तोऽयमित्यन्ये, परिणामो-विकारः, परिमाण इत्यन्ये ॥

८६-९३ शमू दमूच् उपशमे, तमूच् काङ्क्षायाम्, श्रमूच् खेदतपसोः, भ्रमूच् अनवस्थाने, क्षमौच् सहने, मदैच् हर्षे, क्लमूच् ग्लानौ ॥

अ०—अथ शमादीनां सेटां सप्तकं श्ये दीर्घार्थं, मदैच् पर्यन्तन्तम्, क्लमूच् पर्यन्तं चाष्टकं घिनणर्थं च प्रदर्श्यते, अनवस्थानं-देशान्तरप्राप्तिः, उदिदयमित्येके, णौ हर्षग्लपनयोर्घटादित्वाद् ह्रस्वत्वे मदयति, अन्यत्र प्रमादयति ॥

९४-९७ हान्ता-मुहौच् वैचित्ये, द्रुहौच् जिघांसायाम्, ष्णुहौच् उद्गिरणे, ष्णिहौच् प्रीतौ वृत्पुषादिः ॥

अ०—अथ हान्ताश्चत्वारो वैचित्यं-विवेकः, केचित्तु शमू-दमू-तमू-श्रमू-भ्रमू-क्षमौ-मदै-असू-यसू-प्लुषू-लुट-भृशू-भ्रंशू-कृश-ञितृष-रुष-हृष-कुप-गुप-लुप-लुभ क्लिदौ-ऋधू-गृधूचां पुष्यादित्वं नेच्छन्ति तन्मते पुष्याद्यङ्भावे सिचि अशमीत् अदमीत् इत्यादयः पुष्यादिदिवाद्यन्तर्गणो वर्तितः संपूर्णः ।

## परस्मैपदिनः ॥

९८ षूङौच् प्राणिप्रसवे[1] ॥

---

१. प्रसूनं कुसुमम् इत्यादिप्रयोगदर्शनादयमप्राणिप्रसव इत्यन्ये ।

अ०—अथ आत्मनेपदिषु सूयत्या दिर्नवकः कयोस्तस्य नत्वार्थः प्रदर्श्यते [सूयत्यादि-॥ ४-२-७ इतिसूत्रेण]

९९ दूङ्च् परितापे ॥

अ०—परितापो-खेदः ॥

१००-१०६ ईदन्ताः—दीङ्च् क्षये, धीङ्च् अनादरे, मींङ्च् हिंसायाम्, रींङ्च् श्रवणे, लींङ्च् श्लेषणे, डींङ्च् गतौ, व्रीङ्च् वरणे वृत्स्वादिः ॥

१०७-१०९ पीङ्च् पाने, ईङ्च् गतौ, प्रींङ्च् प्रीतौ ॥

अ०—अथ ईदन्ता दश-भ्वादेरेवेह श्यार्थं सूयत्यादिनत्वार्थं च पाठ इत्येके, तन्मते डयते डीन इति स्यात् ॥

११०-१११ जान्तौ युजिंच् समाधौ, सृजिंच् विसर्गे ॥

अ०—अथ जान्तौ द्वौ समाधिश्चित्तवृत्तिनिरोधः

११२ तान्तः—वृतूच् विवरणे ॥

अ०—तान्त एको वृतूङ् वर्तने इत्यस्यैव वरणे दिवादित्वं विधीयते तेनवरणेऽद्युतादित्वाद् द्युद्भ्योऽद्यतन्यां ३।३।४। वृद्भ्यः स्यसनोः ३।३।४९ ।, इति वात्मनेपदं नास्ति, अवर्तिष्ट, वर्तिष्यते, वरणादन्यत्र तु अवृतत्, वृत्स्यति-इत्यपि स्यात् ॥

१ अकर्मकोऽयमनिडपि ॥

११३–११५ दान्ताः—पदिंच् गतौ, विदिंच् सत्तायां, खिदिंच् दैन्ये ।

११६–११८ धान्ताः—युधिंच् संप्रहारे, अनोरुधिंच् कामे, बुधिंच् ज्ञाने ।

११९–१२१ नान्ताः—मनिंच् ज्ञाने, अनिच् प्राणने, जनैचि प्रादुर्भावे ।

१२२–१२३ पान्तौ —दीपैचि दीप्तौ, तपिंच् ऐश्वर्ये वा ।

अ०—अथ दान्तास्त्रयः—गतिर्यानं-ज्ञानं च, सत्ता भावः। धान्तास्त्रयः, संप्रहारो–हननम्, काम–इच्छा, अनुपूर्वो रुधिः कामे दिवादिः । नान्तास्त्रयः, प्रादुर्भावो–उत्पत्तिः । पान्तौ द्वौ, तपं धूपं संताप इत्यस्यैवं–ऐश्वर्येऽपि भ्वादित्वात् प्रतपति–प्रतताप, एके च पतिंच् ऐश्वर्य इति धात्वन्तरं दिवादिं चाहुः, अन्ये तु भ्वादिरेवैश्वर्ये संतापे चात्मनेपदस्ये वेच्छन्ति ॥

१२४–१३२ रान्ताः—पूरैचि आप्यायने, घूरैङ् ज्वरैचि जरायां, धूरैङ् गूरैचि गतौ, शूरैचि स्तम्भे, तूरैचि त्वरायाम्, घूरादयो हिंसायां च, चूरैचि दाहे ।

अ०—अथ रान्ताः–आप्यायनं-वृद्धिः, जरा-वयोहानिः,

---

१. दिवादित्वमात्मनेपदं च वा विधीयत इति शेषः ॥

तालव्यादिर्गतित्वरायामित्यन्ये, घूरादयोऽपि हिंसायाम्, चकाराद् यथायथमुक्तेषु जरादिषु ॥

१३३-१३६ शान्ताः—क्लिशिच् उपतापे, लिशिंच् अल्पत्वे, काशिच् दीप्तौ, वाशिच् शब्दे ।

आत्मने भाषाः ॥

अ०—अथ शान्ताश्चत्वारः ।

इति आत्मनेपदिनः ॥

१३७ कान्तः—शकींच् मर्षणे ।

अ०—अथ कान्त एकः, मर्षणं-क्षमा, अनिडयम्, मर्षणे श्यविकरणोऽर्थान्तरे तु श्नुविकरणः स्वादिपठित एव इत्येके, अन्ये तु शक विभाषिते मर्षणे इति पठन्ति-व्याचक्षते च मर्षणे, शश्नोतेः परस्मैपदं च श्ये विकल्प्यते-अङ्इटौ च शक्यते, शक्यति-अशकीत्-अशकत्-शक्ता-शकिता, अन्यत्र शक्नोति, अशकत्, शक्ता ॥

१३८—चान्तः—शुचृगैच् पूतिभावे ।

१३९ जान्तः—रंजींच् रागे ।

१४० पान्तः—शपींच् आक्रोशे ।

१. शूरैचिधातुः ॥

१४१ षान्तः—मृषीच् तितिक्षायाम् ।

१४२ णहींच्—बन्धने ।

उभयतो भाषा ॥

अ०—अथ चान्त एकः, पूतिभावः–क्षोदः । जान्त एकः, पान्त एकः, षान्त एकः, तितिक्षा–क्षमा, हान्त एकः ।

इति उभयपदिनः

इति दिवादयो धातवः ॥

## अथ स्वादयो धातवः ।

१ षुंगट् अभिषवे ।

अ०—अथ स्वादयो वर्णक्रमेण निदर्श्यन्ते, तत्रापि प्रसिद्ध्यनुरोधेनादौ षुंगट् अभिषवे, अभिषवः–क्लेदनं–संधनाऽख्यं, पीडनमंथनं[१] वा, टित्वं स्वादिज्ञापनार्थमेवं सर्वत्र ॥

२–५ इदन्ताः—षिंगट् बन्धने, शिंगट् निशातने, डुमिंगट् प्रक्षेपणे, चिंगट् चयने ।

अ०—अथ इदन्ताश्चत्वारः, निशातनं–तनूकरणम्, ड्वित्वं

१. स्नानमिति चान्द्राः ॥

त्रिमकर्थं, केचित्तु चिग्ण् चय इति चुरादौ पठन्ति, तस्य च घटादित्वं चिस्फुरोर्नवा ।४।२।१२।, इत्यात्वाभावमिच्छन्ति, तन्मते चययति, आत्वमप्यन्ये चापयति ॥

६—ऊदन्तः—धूग्ट् कम्पने ।

७-९ ऋदन्ताः—स्तृंग्ट् आच्छादने, कृंग्ट् हिंसायाम्, वृग्ट् वरणे ।

उभयतो भाषा ॥

अ०—ऊदन्त एकः, ऋदन्तास्त्रयः ।

इति उभयपदिनः ॥

१० इदन्तः—हिंट् गतिवृद्ध्योः ।

११-१२ उदन्तौ—श्रुंट् श्रवणे, दुदुंट् उपतापे ।

१३-१४ ऋदन्तौ—पृंट् प्रीतौ, स्मृंट् पालने च ।

अ०—इदन्त एकः, उदन्तौ द्वौ, गतावित्यन्ये, द्वित्वमप्यर्थः, ऋदन्तौ द्वौ, चकारात् प्रीतौ ॥

१५-१६ कान्तौ—शक्लृंट् शक्तौ, तिक् हिंसायाम् ।

१७ गान्तः—तिग हिंसायाम् ।

१८ घान्तः—षघट् हिंसायाम् ।

१९-२१ धान्ताः—राधं साधंट् संसिद्धौ, ऋधूट् वृद्धौ।

२२-२३ पान्तौ—आप्लृंट् व्याप्तौ, तृपट् प्रीणने।

२४ भान्तः—दम्भूट् दम्भे।

२५-२६ वान्तौ—कृवुट् हिंसाकरणयोः, चिवुट् गतौ।

२७ षान्तः—ञिधृषाट् प्रागल्भ्ये।

परस्मैभाषाः॥

अ०—अथ कान्तौ द्वौ, जीवनेऽपि इत्यन्ये। गान्त एकः, घान्त एकः, आस्कन्दनेऽपि-आद्यौ इत्यन्ये, अन्त्योऽषोपदेश इत्येके, तिकतिग चषघ हिंसायामित्यन्ये पेठुः, धान्तास्त्रयः, संसिद्धिः-फलसंपत्तिः, षोपदेशोऽयमित्येके, पान्तौ द्वौ, भान्त एकः, वान्तौ द्वौ, प्रीणनेऽप्यन्ये, षान्त एको ञित्वं ज्ञानेच्छा० (५।२।९२) इति सति क्तार्थम्, संघातेऽप्यन्ये।

इति परस्मैपदिनः॥

२८ घान्तः—ष्टिघिट् आस्कन्दने।

२९ नान्तः—अशौटि व्याप्तौ।

आत्मने भाषौ॥

इति स्वादयो धातवः॥

---

१. तिक-तिगौ। २. धिवुट्धातुः॥

अ०—अथ षान्त एकः, शान्त एकः, इत्यात्मनेपदिनौ।

इति स्वादयो धातवः सम्पूर्णाः ॥

## अथ तुदादयो धातवः ।

१-५ तुदींत् व्यथने, भ्रस्जींत् पाके, क्षिपींत् प्रेरणे, दिशींत् अतिसर्जने, कृषींत् विलेखने ।

अ०—अथ तुदादयो वर्णक्रमेण प्रदर्श्यन्ते, तत्रापि प्रसिद्ध्यनुरोधेनादौ तुदींत् व्यथने, तित्त्वं तु तुदादिज्ञापनार्थं सर्वत्र ज्ञेयम्, अतिसर्जनं–त्यागः ॥

६-१३ मुच्लृंती मोक्षणे, विद्लृंती लाभे, लुप्लृंती छेदने, लिपींत् उपदेहे, षिचींत् क्षरणे, कृतैत् छेदने, खिदींत् परिघाते, पिशत् अवयवे ।

वृत्मुचादिः ॥

अ०—अथ मुचादयोऽष्टौ, तत्राद्याः पञ्चानिट उभयपदिनश्च, त्रयः परस्मैपदिनः खिदींत् वर्जाः सेटश्च, उपदेहो वृद्धिः, मुचादिस्तुदाद्यन्तर्गणोऽष्टक संपूर्णः ॥

१४-१७ इदन्ताः—रिं पीत् गतौ, धिंत् धारणे, क्षिंत् निवासगत्योः ।

१८ ऊदन्तः—षूत् प्रेरणे ।

१९ ऋदन्त—मृंत् प्राणत्यागे ।

२०-२१ ॠदन्तौ—कॄत् विक्षेपे, गॄत् निगरणे ।

अ०—अथ प्रकृतवर्णक्रमेण इदन्ताश्चत्वारः, ऊदन्त एकः, ऋदन्त एकः, ॠदन्तौ द्वौ, निगरणं-भोजनम् ॥

२२ खान्तः—लिखत् अक्षरविन्यासे ।

२३-२७ चान्ताः—जर्च झर्चत् परिभाषणे, त्वचत् संवरणे, ऋचत् स्तुतौ, ओव्रश्चौत् छेदने ।

अ०—अथ खान्त एकः सेट्, चान्ताः पञ्च, तर्जनेऽपीत्यन्ये, जर्चति श्वादिरित्यन्ये, संवरणमाच्छादनम्, दन्त्योपान्त्योऽयमोदित् सूयत्याद्योदितः ( ४।२।७० ), इति क्तयोर्नत्वार्थः ॥

२८-३३ छान्ताः—ऋछत् इन्द्रिय प्रलय-मूर्त्तिभावयोः, विछत् गतौ, उछैत् विवासे, मिछत् उत्क्लेशे, उछुत् उञ्छे, प्रछंत् ज्ञीप्सायाम् ।

अ०—अथ छान्ताः षट्, इन्द्रियाणां प्रलय-इन्द्रियमोहे मूर्त्तिभावे च, विवासोऽतिक्रमः, उत्क्लेशो-बाधनम्, उञ्छ उच्चयः, ज्ञीप्सा-जिज्ञासा ॥

---

१. ओव्रश्चौत् धातुः ।

३४-३९ जान्ताः—उब्जत् आर्जवे, सृजंत् विसर्गे, रुजोंत् भङ्गे, भुजोंत् कौटिल्ये, टुमस्जोंत् शुद्धौ, जर्जत् [ परिभाषणे ] ।

अ०—अथ जान्ताः षट्, शुद्ध्या स्नानं ब्रुडनं च लक्ष्यते त्वनुबन्धः पूर्ववत्, तर्जनेऽपीत्यन्ये[1] ॥

४०-४१ झान्तौ—झर्झत् परिभाषणे, उद्झत् उत्सर्गे ।

४२-४५ डान्ताः—जुडत् गतौ, पृड मृडत् सुखने, कडत् मदे ।

४६-५४ णान्ताः—पृणत् प्रीणने, तुणत् कौटिल्ये, मृणत् हिंमायाम्, द्रुणत् गतिकौटिल्ययोश्च, पुणत् शुभे, मुणत् प्रतिज्ञाने, कुणत् शब्दोपकरणयोः, घुण घूर्णत् भ्रमणे ।

५५ तान्तः—चृतैत् हिंसाग्रन्थयोः ।

५६-५७ दान्तौ—णुदंत् प्रेरणे, षद्लृंत् अवसादने ।

५८ धान्तः—विधत् विधाने ।

५९-६० नान्तौ—जुन शुनत् गतौ ।

६१ पान्तः—छुपंत् स्पर्शे ।

६२-७० फान्ताः—रिफत् कथनयुद्धहिंसादानेषु, तृफ

---

१. जर्ज झर्झत् धातू ॥

तृंफत् तृप्तौ, ऋफ ऋंफत् हिंसायाम्, दृफ दृंफत् उत्क्लेशे, गुफ गुंफत् ग्रन्थने ।

७१-७६ भान्ताः—उभ उभंत् पूरणे, शुभ शुम्भत् शोभार्थे, दृभैत् ग्रन्थे, लुभत् विमोहने ।

अ०—अथ शान्तौ द्वौ, दोपान्त्योऽयम्, डान्ताश्चत्वारः, भक्षणे इत्यन्ये, णान्ता नव सेटश्च, चाद् हिंसायाम्, शुभं-शुभविषया क्रिया, तान्त एकः, दान्तौ द्वौ, शद्लृं शातने इति तु न पठितव्य एव शित्यात्मनेपदित्वेन श(तु)रभावे नो लुग् विकल्पाप्राप्तेरशदत् इत्यादेस्तु तेनैव सिद्धेः, धान्त एकः, नान्तौ द्वौ, पान्त एकः, फान्ताः नव सेटश्च, भान्ताः षट् सेटश्च, शुभं भाषणे चेत्यर्थभेदात् पाठो भ्वादौ शुंभ शोभनार्थे, दंत्यादिरित्येके, विमोहनं-व्याकुलीकरणम् ॥

७७-८४ रान्ताः—कुरत् शब्दे, क्षुरत् विलेखने, खुरत् छेदने च, घुरत् भीमार्थशब्दयोः, पुरत् अग्रगमने, मुरत् संवेष्टने, सुरत ऐश्वर्यदीप्त्योः, स्फुरत् स्फुरणे ।

८५-९७ लान्ताः—स्फुलत् स्फुरणे, किलत् श्वैत्यक्रीडनयोः, इलत् गतिस्वप्नक्षेपणेषु, हिलत् हावकरणे, शिल सिलत् उञ्छे, तिलत् स्नेहे, चलत् विलसने, चिलत् वसने, विलत् वरणे, बिलत् भेदने, णिलत् गहने, मिलत् श्लेषणे ।

९८-१०३ शान्ताः—स्पृशंत् संस्पर्शे, रुशं रिशंत् हिंसायाम्, विशंत् प्रवेशने, मृशंत् आमर्शे, लिशं गतौ ।

अ०—अथ रान्ता अष्ट, छेदनं–विलेखनम्, चकाराद् विलेखने, षोपदेशोऽयमित्येके, लान्तास्त्रयोदश, चलनं[1] इत्येके, कुटादी इमौ[2] इत्येके, षोपदेशोऽयमित्येके, णौ घटादित्वाद् ह्रस्वत्वे चलयति, दन्त्यौष्ठ्यादिः[3], ओष्ठ्यादिः[4], शान्ताः षड् अनिटश्च, आमर्शनं–स्पर्शः ॥

१०४–१०६ षान्ताः—ऋषत् गतौ, इषत् इच्छायाम्, मिषत् स्पर्धायाम् ।

१०७–१११ हान्ताः—वृहौत् उद्यमे, तृहौ तृंहौ स्तृहौ स्तृंहौत् हिंसायाम् ।

अ०—अथ षान्तास्त्रयः सेटश्च, हान्ताः पञ्च–उद्यम उद्धरणम्, स्तृहौ षोपदेश इत्येके, स्तृंहौ इत्ययमपि षोपदेशोऽयमित्यन्ये ।

## अथ कुटादिः ।

११२ कुटत् कौटिल्ये ।

अ०—अथ तुदाद्यन्तर्गणः कुटादिस्तत्रापि प्रसिद्ध्यनुरोधेनादौ कुटतिः ॥

---

१ स्फुलत् स्फुरणे धातुः । २ स्फुर स्फुल धातू कुटादी अकारोपधौ केचित् पठन्ति । ३ विलत् वरणे धातुः । ४ विलत् भेदने धातुः ॥

११३-११४ उदन्तौ-गुंत् पुरीषोत्सर्गे, ध्रुंत् गति-स्थैर्ययोश्च ।

११५-११६ ऊदन्तौ-णूत् स्तवने, धूत् विधूनने ।

अ०—अथ उदन्तौ द्वौ, चात् पुरीषोत्सर्गे, ऊदन्तौ द्वौ ।

११७-११८ चान्तौ—कुचत् संकोचने, व्यचत् व्याजीकरणे ।

११९ जान्तः—गुजत् शब्दे ।

१२०-१२७ टान्ताः—घुटत् प्रतीघाते, चुट छुटत् त्रुटत् छेदने, तुटत् कलहकर्मणि, मुटत् आक्षेपप्रमर्दनयोः, स्फुटत् विकसने, पुटत् संश्लेषणे ।

१२८ ठान्तः—लुठत् संश्लेषणे ।

१२९-१४२ डान्ताः—कुडत् घसने, कुडत् बाल्ये च, गुडत् रक्षायाम्, जुडत् बन्धे, तुडत् तोडने, लुड घुड स्थुडत् संवरणे, बुडत् उत्सर्गे च, व्रुड् भ्रुडत् संघाते, द्रुड हुड त्रुडत् निमज्जने ।

१४३ णान्तः—चुणत् छेदने ।

१४४ पान्तः—डिपत् क्षेपे ।

१४५-१४६ रान्ताः—छुरत् छेदने, स्फुरत् स्फुरणे ।

१४७ लान्तः—स्फुलत् संचये च ।

परस्मैभाषाः ॥

अ०—अथ चान्तौ द्वौ, जान्त एकः, टान्ता अष्ट सेटश्च, ठान्त एकः, डान्तोऽयमित्यन्ये । डान्ताश्चतुर्दश सेटश्च, घसनं–भक्षणम्, घनत्व इत्यन्ये–घनत्वं–मान्द्रत्वम्, चकारात् घसने, तोडनं–भेदः, चकारात् संवरणे, संवरणेऽप्यन्ये[1], णान्त एकः सेट्, पान्त एकः सेट्, रान्तास्त्रयः सेटः, लान्त एकः, चकारात् स्फुरणे, चलने इत्येके ।

वर्तितः कुटादिः ॥

इति परस्मैपदिनो धातवः ॥

१४८ उदन्तः कुङ्त् शब्दे ।

१४९ ऊदन्तः कूङ्त् शब्दे ।

अ०—अथ उदन्त एकः, ऊदन्त एकः ॥

१५० रान्तः—गुरैति उद्यमे ।

अ०—अथ रान्त एकः, कुटादिस्तुदाद्यन्तर्गणो वर्तितः–सम्पूर्णः ॥

१. त्रुड त्रुडत् धातू ॥

१५१-१५३ ऋदन्तास्त्रयः--पृंङ्त् व्यायामे, दृङ्त् अनादरे, धृङ्त् स्थाने ।

अ०—अथ प्रकृतवर्णक्रमेण ऋदन्तास्त्रयोऽनिटश्च, व्यायामः-उद्योगः, धारणे इत्यन्ये ॥

१५४-१५७ जान्ताः--ओविजैति भयचलनयोः, ओलजैङ् ओलस्जैति व्रीडे, ष्वञ्जित् सङ्गे ।

१५८ षान्तः—जुषैति प्रीतिसेवनयोः ।

आत्मनेभाषाः ॥

इत्यादयस्तुदादयस्तितो धातवः ॥

अ०—अथ जान्ताश्चत्वारः, उदित् सूयत्याद्योदितः (४। २। ७०), इति क्तयोस्तस्य नत्वार्थमेवमुत्तरत्रापि, षान्त एकः ।

इति आत्मनेपदिनः ॥

इति तुदादेरवचूर्णिः ॥

## अथ रुधादयः ।

१ रुधृंपी आवरणे ।

अ०—अथ रुधादयः श्नविकरणा वर्णक्रमेण प्रदर्श्यन्ते, पित्त्वं रुधादिज्ञापनार्थं सर्वत्र ज्ञेयम्, आवरणं–व्यापित्वम् ।

२-३ चान्तौ—रिचृंपी विरेचने, विचृंपी पृथग्भावे।

४ जान्तः—युजृंपी योगे।

५-९ दान्ताः—भिदृंपी विदारणे, छिदृंपी द्वैधीकरणे, क्षुदृंपी संपेषे, ऊच्छृदृपी दीप्तिदेवनयोः, ऊतृदृपी हिंसा-नादरयोः।

## उभयतो भाषाः ॥

अ०—अथ चान्तौ द्वौ, विरेचनं-निःसारणम्, जान्त एकः, दान्ताः पञ्च, अद्वैधस्य पृथग्भावे, वमनेऽप्यन्ये, ऊदिदयं, उत्तरश्च कयोरिटविकल्पार्थः।

इति उभयपदिनः ॥

१०-१२ चान्ताः—पृचैप् सम्पर्के, वृचैप् वरणे, तञ्चूप् [ संकोचने ]।

१३-१७ जान्ताः—तञ्जौप् संकोचने, भञ्जौप् आमर्दने, भुजंप् पालनाभ्यवहारयोः, अंजौप् व्यक्तिम्रक्षणगतिषु, ओविजैप् भयचलनयोः।

१८ तान्तः—कृतैप् वेष्टने।

१९ दान्तः—उंदैप् क्लेदने।

---

१ ऊच्छृदृपी धातुः।

२०—२१ षान्तौ–शिष्लृंप् विशेषणे, पिष्लृंप् संचूर्णने ।

२२ सान्तः—हिंसुप् हिंसायाम् ।

२३ हान्तः—तृहप् हिंसायाम् ।

परस्मैभाषाः ॥

अ०—अथ चान्तास्त्रयः, जान्ताः पञ्च, अभ्यवहारो भोजनं, व्यक्तिः–प्रकटता, म्रक्षणं–घृतादिसेकः, तत्र केवलेव म्रक्षणे वर्तते, सोपसर्गविशेषस्तु शेषयोरर्थयोरिति विशेषः, ओदित् सूयत्याद्योदितः (४।२।७०), इति क्तयोर्नत्त्वार्थम्, तान्त एकः, दान्त एकः, णान्तौ द्वौ, विशेषणं–गुणान्तरोत्पादनम्, सान्त एकः, हान्त एकः ।

इति परस्मैपदिनः ॥

२४–२५ दान्तौ—खिदिंप् दैन्ये, विदिंप् विचारणे ।

२६ धान्तः—ञिइंन्धैपि दीप्तौ ।

आत्मनेभाषाः ॥

इति रुधादयः पितो धातवः ॥

अ०—अथ दान्तौ द्वौ, धान्त एको ञित्वं ज्ञानेच्छा० ( ५ । २ । ९२ ) इत्यादिना सत्यर्थे क्तार्थम् ।

इति आत्मनेपदिनः ॥

रुधादिनामवचूरिः सम्पूर्णा ॥

## अथ तनादयः ।

१ तनूयी विस्तारे ।

अ०—अथ तनादय उ-विकरणा वर्णक्रमेण प्रदर्श्यन्ते ॥

२-७ णान्ताः—षणूयी दाने, क्षणूग् क्षणूयी हिंसायाम्, ऋणूयी गतौ, तृणूयी अदने, घृणूयी दीप्तौ ।

उभयतो भाषाः ॥

अ०—तत्रोभयपदिषु णान्ताः सप्त सेटश्च, यित्वं तनादित्वज्ञापनार्थं सर्वत्र ज्ञेयम्, अमुं न पठन्त्येके, आदाने इत्येके, णान्तोऽयमित्येके, क्षणू तृणू घृणू धातूनां नेच्छन्त्येके !

इति उभयपदिनः ॥

८-९ नान्तौ—वनूयि याचने, मनूयि बोधने ।

आत्मनेभाषौ ॥

अ०—अथ नान्तौ द्वौ ।

इति आत्मनेपदिनौ ॥

इति तनादीनामवचूरिः सम्पूर्णा ॥

---

१. उपान्तस्य गुण इतिशेषः ॥

# अथ क्र्यादयः ।

१. डुक्रींगश् द्रव्यविनिमये ।

अ०—क्र्यादयः श्नाविकरणा वर्णक्रमेण प्रदर्श्यन्ते, तत्र प्रथमं डुक्रींगश द्रव्यविनिमये, विनिमयः–परावर्तः, शित्वं क्र्यादित्वज्ञापनार्थम् ।

२. इदन्तः—षिंगश् बन्धने ।

३-५ ईदन्ताः—प्रींगश् तृप्तिकान्त्योः, श्रींगश् पाके, मींगश् हिंसायाम् ।

६-७ उदन्तौ—युंगश् बन्धने, स्कुंगश् आप्रवणे ।

८-९ ऊदन्तौ—क्नूगश् शब्दे, दॄगश् हिंसायाम् ।

अ०—अथ इदन्त एकः, ईदन्तास्त्रयः, कान्तिरभिलाषः, उदन्तौ द्वौ, आप्रवणं–उद्धरणम्, ऊदन्तौ द्वौ, गतावित्यन्ये[1] ॥

१० हान्तः—ग्रहीश् उपादाने ।

अ०—हान्त एकः, उपादानं–स्वीकारः ॥

१. द्रूगश्धातुः ॥

# अथ क्र्याद्यन्तर्गणः प्वादिः ।

प्वादेर्ह्रस्वः (४।२।१०५), इति ह्रस्वप्रयोजनः प्रदर्श्यते ॥

११-१३ ऊदन्ताः—पूगृश् पवने, लूगृश् छेदने, धूगृश् कम्पने ।

१४-१६ ॠदन्ताः—स्तॄगृश् आच्छादने, कॄगृश् हिंसायाम्, वॄगृश् वरणे ॥

## उभयतो भाषाः ॥

अ०—तत्रोदन्तास्त्रयः सेटश्च, पवनं-शुद्धिः, अथ प्वाद्यन्तर्गणो ल्वादिः ऋल्वादेरेषां तो नोऽप्रः (४।२।६८), इति नत्वार्थं प्रदर्श्यते, ॠदन्तास्त्रयो, ह्रस्वान्तोऽयमिति नन्दी ॥

इति उभयपदिनः ॥

१७ आदन्तः—ज्यांश् हानौ ।

१८-२१ ईदन्ताः—रींश् गतिरेषणयोः, लींश् श्लेषणे, व्लींश् वरणे, प्लींश् गतौ ।

२२-३२ ॠदन्ताः—कॄ मॄ शॄश् हिंसायाम्, पॄश् पालन-पूरणयोः, बॄश् भरणे, भॄश् भर्जने च, दॄश् विदारणे, जॄश् वयोहानौ, नॄश् नये, गॄश् शब्दे, ऋश् गतौ[1] ।

१. भय इत्यन्ये ॥

## वृत्प्वादिः, वृत्ल्वादिः ॥

अथ आदन्तोऽनिट् एकः, वयोहानावित्येके । ईदन्ताश्चत्वारः, रेषणं–हिंसा, गतावित्यन्ये[1], लीशाश्लेषण इत्यप्येके–पठन्ति । ऋदन्ता एकादश, ओष्ठ्यादिः, वरण इत्यन्ये । भर्जनं पाकः, चाद् भरणे भर्त्सन इत्यन्ये, णौ घटादित्वात् नरयति, प्वादिल्वादिश्च वृत् वर्तितः–सम्पूर्ण इत्यर्थः ॥

३३ आदन्तः—ज्ञांश् अवबोधने ।

३४ इदन्तः—क्षिष्श् हिंसायाम् ।

३५–३६ ईदन्तौ—व्रींश् वरणे, भ्रींश् भरणे ।

३७ ठान्तः—हेठश् भूतप्रादुर्भावे ।

३८ डान्तः—मृडश् सुखने ।

३९–४२– थान्ताः—श्रन्थश् विमोचनप्रतिहर्षणयोः, मन्थश् विलोडने, ग्रन्थश् संदर्भे, कुन्थश् संक्लेशे ।

अ०—अथ आदन्त एकः । इदन्त एकः, षित्वमङर्थम्, दीर्घान्तोऽयमिति केचित् । ईदन्तौ द्वौ, भय इत्यन्ये । ठान्त एकः, भूतप्रादुर्भावोऽतिक्रान्तोत्पत्तिः । डान्त एकः । थान्ताश्चत्वारः सेटश्चेति, श्लेषण[3] इत्यन्ये ॥

४३ दान्तः—मृदश् क्षोदे ।

१. ब्लींश् वरणे । २ वृश् भरणे । ३. कुन्थश् संक्लेशे ॥

४४-४५ धान्तौ—गुधश् रोषे, बन्धश् बन्धने ।

४६-४८ मान्ताः—क्षुभश् संचलने, णभ तुभश् हिंसायाम् ।

४९ वान्तः—खवश् हेठश्वत् ।

५०-५१ शान्तौ—क्लिशौश् विबाधने, अशश् भोजने ।

५२-५८ षान्ताः—इषश् आभीक्ष्ण्ये, विषश् विप्रयोगे, प्रुष प्लुषश् स्नेह-सेचन-पूरणेषु, मुषश् स्तेये, पुषश् पुष्टौ, कुषश् निष्कर्षे ।

५९ सान्तः—ध्रसूश् उञ्छे ।

परस्मैभाषाः ॥

अ०—दान्त एकः, धान्तौ द्वौ, मान्तास्त्रयः, वान्त एकः, यथा हेठश् भूतप्रादुर्भावे तथाऽयमपि वर्णक्रमानुरोधेन अत्रैव पठितः, शान्तौ द्वौ, षान्ताः सप्त सेटश्च, आभीक्ष्ण्यं पौनः पुन्यं, निष्कर्षो बहिष्कर्षणम्, सान्त एकः ॥

परस्मैभाषाः ॥

६० ऋदन्तः—वृङ्श् संभक्तौ ।

आत्मनेभाषा ॥

अ०—अथ ऋदन्त एकोऽनिट् च ।

इति शितः क्र्यादयो धातवः ॥

# अथ चुरादयो धातवः ।

१ चुरण् स्तेये ।

अ०—अथ णितश्चुरादयो वर्णक्रमेण प्रस्तूयन्ते, णित्त्वं चुरादिज्ञापनार्थं सर्वत्र ज्ञेयम्, स्वार्थिकत्वेनान्तरङ्गत्वाद् विशेषविधानाच्च कर्त्रादिकारकापेक्षत्वेन बहिरङ्गेभ्यः सामान्यविहितेभ्यश्च तिवादिभ्यः प्रागेव चुरादिभ्यः (३।४।१७), इति स्वार्थे णिचि णिजन्तस्यापि क्रियार्थत्वाद् धातुत्वेन शेषात् (३।३।१००), इति परस्मैपदे च चोरयति णिचो गित्वाभावात् फलवत्कर्तर्यात्मनेपदं नास्ति, चन्द्रस्तु णिज्यपि उभयपदित्वमाम्नासीत्, णिज्विकल्पं च, पचुण्–चितुण् प्रभृतीनां सनकारनिर्देशमकृत्वा उदित्करणं चुरादिणिचोऽनित्यत्वज्ञापकं च चिन्त्यत इत्यादौ नलोपाभावार्थं, ततो णिज् लुकः स्थानित्वेन उपान्त्यत्वाभावान्नलुकोऽप्रसङ्गात् तेन चोरति चिन्तति इत्यादिसिद्धमिदं च ज्ञापकम्, घुषेरविशब्दे इति विशब्दन(नं)-प्रतिषेधः, अयं हि विशब्देन घुषेरिट् प्रतिषेधाभावार्थः, स च णिचो नित्यत्वेऽनेकस्वरत्वादेव सिद्धः, तेन " महीपालवचः श्रुत्वा जुघुषुः पुष्यमाणवा " इत्यपि सिद्धम् ॥

२–३ ऋदन्तौ–पृण् पूरणे, घृण् स्रवणे ।

---

१. स्वाभिप्रायं नानाशब्दैराविष्कृतवन्त इत्यर्थः ॥

अ०—अथ ऋदन्तौ द्वौ, ॠदन्तोऽयमित्येके ।

४–६ कान्ताः—शुल्क वल्कण् भाषणे, नक्क धक्कण् नाशने, चक्क चुक्कण् व्यथने, टकुण् बन्धने, अर्कण् स्तवने ।

७–८ चान्तौ—पिच्चण् कुट्टने, पचुण् विस्तारे ।

९ छान्तः—म्लेच्छण् ( अव्यक्तवाग् ) म्लेच्छने ।

१०–२० जान्ताः—उर्जण् बलप्राणनयोः, युज पिजुण् हिंसा–बल–दान–निकेतनेषु, क्षुजुण् कृच्छ्रजीवने, पूजण् पूजायां, गज मार्जण् शब्दे, तिजण् निशाने, वज व्रजण् मार्गणसंस्कारगत्योः, रुजण् हिंसायाम् ।

अ०—अथ कान्ता अष्ट सेटश्च, चान्तौ द्वौ, छान्त एकः, जान्ता एकादश, प्राणनं–जीवनं, निकेतनं–गृहं, लोकतर्केति दण्डकेऽनयोः पुनः पाठोऽर्थभेदार्थः सकर्मकार्थश्च, अत्र लुजुमप्येके पठन्ति, मार्गणो बाणः, तस्य संस्कारे गतौ च, मार्गसंस्कारेऽपीत्यन्ये ।

२१–४३ टान्ताः—नटण् अवस्यन्दने, तुट चुट चुट्ड छुटण् छेदने, कुट्टण् कुत्सने च, पुट्ट चुट्ट षुट्टण् अल्पीभावे, पुट मुटण् संचूर्णने, अट्ट स्मिटण् अनादरे, लुण्टण् स्तेये च, स्निटण् स्नेहने, घट्टण् चलने, खट्टण् संवरणे, षट्ट स्फिट्टण् हिंसायाम् स्फूटण् परिहासे, कीटण् वर्णने, वटुण् विभाजने, रुटण् रोषे ।

१. कुट्टण् कुत्सने ।

अ०—अथ टान्तास्त्रयोविंशतिः, अवस्यन्दनं-भ्रंशः, चाच्छेदने, अपोपदेशोऽयमनादरार्थश्चेत्येके, अट्ट-अल्पीभाव इत्येके, चाद् अनादरे, पट्टो बल-दान-निकेतनेष्वपीत्यन्ये, स्फिट्टण् अनादरे इत्यन्ये, अयं स्फुटणेत्येके, बन्ध इत्यन्ये, वट्टण इत्ययं डान्तोऽयमित्येके ॥

४४-४९ ठान्ताः—शठ श्वठ श्वठुण् संस्कारगत्योः, शुठण् आलस्ये, शुठुण् शोषणे, गुठुण् वेष्टने ।

५०-६६ डान्ताः—लडण् उपसेवायाम्, स्फुडुण् परिहासे, ओलडुण् उत्क्षेपे, पीडण् गहने, तडण् आघाते, खड खडुण् भेदे, कडुण् खण्डने च, कुडुण् रक्षणे, गुडुण् वेष्टने च, चुडुण् छेदने, मडुण् भूषायाम्, भडुण् कल्याणे, पिडुण् सङ्घाते, ईडण् स्तुतौ, चडुण् कोपे, जुडण् प्रेरणे ।

६७-७२ णान्ताः—चूर्ण वर्णण प्रेरणे, चूण तूणण् संकोचने, श्रणण् दाने, पुणण् सङ्घाते ।

७३-७८ तान्ताः—चितुण् स्मृत्याम्, पुस्त बुस्तण् आदर-अनादरयोः, मुस्तण् सङ्घाते, कृतण् संशब्दने, स्वर्त गतौ।

अ०—अथ ठान्ताः षट्, डान्ताः सप्तदश, जिह्वोन्मथे घटादित्वाह्लडयति, उदिदयमित्येके, गहनं-बाधा, अवगाहन इत्यन्ये, चाद् भेदे[3] खुडुण् खण्डन इत्येके, चाद् रक्षणे, दान्तोऽ-

१.पुट्टण् अल्पीभावे।२भेदन इत्यर्थः।३कडुण् खण्डने। ४गुडुण् वेष्टने।

यमित्यन्ये, पडुण् अयमित्येके, णान्ताः षट् सेटश्च, प्रेरणं–दलनम्, तान्ताः षट्, उदित्वान्नोऽन्ते चिन्तयति **णिवेत्त्यास-श्रन्थघट्टवन्देरनः** ( ५।३।१११ ), इत्यनापवादे **भीषि-भूषिचिन्तिपूजिकथिकुम्बिचर्चिस्पृहितोलिदोलिभ्यः** (५। ३।१०९ ), इति अङि चिन्ता, भीष्यादिभ्योऽनापवादे अप्रत्ययेऽपि णेर्लुकि भीषादीनां सिद्धौ–अङविधानं णेर्लुकोऽनित्यत्वज्ञापनार्थं, तेन णेर्लुगभावे **संयोगात्** ( २।१।५२) इति इयि चिन्तिया तथा 'न यमेन न जातवेदसा न कुबेरेण च (न) वज्रपाणिना मघवो युधि सुप्रकम्पयाः श्रमनेनैव वसुंधरापते!' ॥ १ ॥ अत्र सु[प्र]पूर्वात् कम्पेः खलि, णेर्लुगभावे, गुणे, अयादेशे च सुप्रकम्पया इति सिद्धम्, ज्ञापकेन च क्वचिदेव लुगभावो ज्ञाप्यते आमादिषु तु सर्वत्र अव्यभिचारायादेश इति **आमन्ताल्वाय्येत्नावय्** ( ४।३।८५ ) इतिवचनं, अयं इति वचनं, अयं वन्दनं इति चन्द्रः, संशब्दनं–ख्यातिः, षोपदेशोऽयमिति नन्दी, कृच्छ्रजीवनेऽप्ययमित्यन्ये ॥

७९–८२ थान्ताः—पथुण् गतौ, श्रथण् प्रतिहर्षे, पृथण् प्रक्षेपणे, प्रथण् प्रख्याने ।

---

१ भडुण् कल्याणे । २ दुःस्वीषतः कृच्छ्राकृच्छ्रार्थात् खल् (५।३–१३९) इतिसूत्रेण 'उपसर्गो न व्यवधायी' इतिन्यायेन खल् प्रत्य स्तस्य सप्तम्येकवचनम् । ३ 'णिलोपोऽप्यनित्यः-' इति परिभाषया । ४ पुस्त आदर–अनादरयोः ॥

८३–८७ दान्ताः—छदण् संवरणे, चुदण् संचोदने, मिदुण् स्नेहने, गुर्दण् निकेतने छर्दण् वमने ।

८८–९२ धान्ताः—बुधुण् हिंसायाम्, वर्धण् छेदनपूरणयोः, गर्द्धण् अभिकाङ्क्षायाम् बन्ध बधण् संयमने ।

अ०—अथ थान्ताश्चत्वारः, प्रतियत्न इत्यन्ये, श्रथण् बन्धने चेति युजादौ पठिष्यमाणोऽप्यर्थभेदाद् इह पुनरधीतः–आत्मनेपदे न रूपान्यत्वार्थं इह पाठ इत्येके, श्राथयते अयं प्रथण् इत्येके, पार्थण् इत्यन्ये, प्रक्षेपण् इत्येके । दान्ताः पञ्च, उर्जने घटादित्वाद् ह्रस्वत्वे छदयति, अदन्तोऽयमित्येके, छदण् अपवारणे युजादेर्नवा (३–४–१८) इति वा णिचि छादयति छदति रूपान्यत्वार्थं च पाठः छादयतेऽत्रात्मनेपदं सिद्धम्, संचोदनं–चोदनं, यन्तोऽयमित्येके, नायमुंदिदिति कौशिकः, पूर्वनिकेतनमित्येके, पूर्वनिकेतनं–आद्यनिवासः, अयं गर्ज इत्यपरे, ठान्तोऽयमित्यन्ये । धान्ताः पञ्च सेटश्च ॥

९३–१०० पान्ताः—छपुण् गतौ, क्षपुण् क्षान्तौ, च्छूपण् समुच्छ्राये, डिपण् क्षेपे, ह्लपण् व्यक्तायां वाचि, डपु डिपुण् संघाते, शूर्पण् माने ।

१०१–१०८ बान्ताः—शुल्बण् सर्जने च, डबु डिबुण् क्षेपे, संबण् संबन्धने, कुबुण् आच्छादने, लुबु तुबुण् अर्दने; पुर्बण् निकेतने ।

---

१. मिदुण् स्नेहने ॥

१०९ मान्तः—यमण् परिवेषणे ।

११० यान्तः—व्ययण् क्षये ।

१११-११३ रान्ताः—यत्रुण् संकोचने, कुद्रुण् अनृतभाषणे, श्वभ्रण् गतौ ।

११४-१२९ लान्ताः—तिलण् स्नेहने, जलण् अपवारणे, क्षलण् शौचे, पुलण् समुच्छ्राये, बिलण् भेदे, तलण् प्रतिष्ठायाम्, तुलण् उन्माने, डुलण् उत्क्षेपे, बुलण् निमज्जने, मुलण् रोहणे, कल किल पिलण् क्षेपे, पलण् रक्षणे, इलण् प्रेरणे, चलण् भृतौ ।

१३० वान्तः—सान्त्वण् सामप्रयोगे ।

१३१ शान्तः—धूशण् कान्तिकरणे ।

१३२-१३५ षान्ताः—श्लिषण् श्लेषणे, लूषण् हिंसायाम्, रुषण् रोषे, प्युषण् उत्सर्गे ।

१३६-१४१ सान्ताः—पसुण् नाशने, जसुण् रक्षणे, पुंसण् अभिमर्दने, बुस पिस जसण् हिंसायाम् ।

१४२-१४३ हान्तौ—बर्हण् हिंसायाम्, ष्लिहण् स्नेहे।

१४४-१४७ क्षान्ताः—म्रक्षण् म्लेच्छने, भक्षण् अदने, पक्षिण् परिग्रहे, लक्षीण् दर्शन-अङ्कनयोः । इतोऽर्थ विशेषे आलक्षिणः ।

अ०—अथ पान्ता अष्ट, अषोपदेशोऽयमित्यन्ये, स्तुपणि-त्येके, डपु डिपुण् अभिमर्दने इत्येके, भान्तावेतावित्यन्ये, बान्ता अष्टौ सेटश्च, तालव्यादिः, चकारान् माने, केचित्तु दभ-दिभु दभूनपि भान्तान् इहाधीयते, संबण् इत्ययं षोपदेश इत्यन्ये, तालव्यादिरयमिति केचित् शम्बलयति, शम्बलं, तुपुण् अयमित्येके, पुर्बण इत्यमरकोशे ओष्ठ्यान्तेषु पठितः तत्प्रकृति-त्वानुरोधात् बान्तेष्वयमस्माभिरिहाधीतः। मान्त एकः, परिवेषण इत्यन्ये, यान्त एकः, गादिरयमित्यन्ये, रान्तास्त्रयः सेटश्च, लान्ताः षोडश णिचोऽनित्यत्वादभावे नाम्युपान्त्य-प्रीकृगृज्ञः कः (५।१।५४), इति के ति(तु)ला, अयं लजणिति नन्दी, बिलण् ओष्ठ्यादिः, णिचोऽनित्यत्वात् तलति अवितलं अन्दोलयतीति तु रुढः, यथा प्रेंखोलयति वीजयति, मुलेति नन्दी, णिचोऽनित्यत्वात् पिलयते, वान्त एकः सेट्, षोपदेशो-ऽयमित्येके, शान्तः एकः, दन्त्योपान्त्योऽमित्येके धृमयति, मूर्धन्यान्त्योऽयमित्यन्ये धृषयति, षान्ताश्चत्वारः, मान्ताः षट् सेटश्च, उदित्वाभे पंसयति उणादौ पंसेर्दीर्घश्च (उणा० ७१८) इत्युः पांसुः, पिमतिर्गतावित्येके, पिसृगतौ पेसति, एके त्वाहु-र्नायं ऋदित् तथा च णिचोऽनित्यत्वाच् चौरादिकेनैव पेसति इतिसिद्धः, भ्वादौ पाठोऽस्यात्मनेपदार्थस्तेन पेसते, हान्तौ द्वौ सेटौ, क्षान्ताश्चत्वारः, भ्वादौ मृक्ष रोष इत्यन्ये, अङ्कनं–चिह्नम्॥

इतः परं अर्थविशेषे चुरादयो लक्षीं पर्यन्ताः प्रस्तूयन्ते।

---

१. उप्रत्ययेकृते अकारस्य दीर्घत्वमितिशेषः॥

१४८ आदन्तः—ज्ञाण् मारणादिनियोजनेषु ।

१४९ उदन्तः—च्युण् महने ।

१५० ऊदन्तः—भूण् अवकल्कने ।

अ०—अथ आदन्त एकः, मारणादयो **मारणतोषण-निशाने ज्ञश्च** (४। २। ३०), इति सूत्रोक्तास्तेषु नियोजनेषु चार्थेषु जानातिश्चुरादिर्नान्यत्र, उदन्त एकः, हसन इत्येके, ऊदन्त एकः, अवकल्कनं-मिश्रीकरणम्, भावयति दध्नौदनं, विकल्कनमिति नन्दी, अवकल्पन इत्यन्ये ॥

१५१-१५३ कान्ता—बुक्कण् भषणे, रक लकण् आस्वादने ।

१५४-१५६ गान्ता—रग लगण् आस्वादने, लिगुण् चित्रीकरणे ॥

१५७-१५९ चान्ताः—चर्चण् अध्ययने, अञ्चण् विशेषणे, मुचण् प्रमोचने ।

१६०-१६१ जान्तौ-अर्जण् प्रतियत्ने, भजण् विश्राणने ।

१६२-१६४ टान्ताः-चट स्फुटण् भेदे, घटण् सङ्घाते हन्त्यर्थाश्च ।

१६५ णान्तः—कणण् निमीलने ।

१६६ तान्तः—यतण् निकारोपस्कारयोः, निरश्च प्रतिदाने ।

१६७–१७१ दान्ताः—शब्दण् उपसर्गाद्भाषाविष्कारयोः, षूदण् आश्रवणे, आङः क्रन्दण् सातत्ये, ष्वदण् आस्वादने, आस्वदः सकर्मकात्, मुदण् संसर्गे ।

अ०—अथ कान्तास्त्रयः, भाषण इत्यन्ये, गान्तास्त्रयः, चान्तास्त्रयः, विशेषणं–अतिशयः, अञ्चयत्यर्थं व्यक्तीकरोतीत्यर्थः, प्रयोजन इत्यन्ये मोचयति कुण्डले प्रयोजयतीत्यर्थः, अन्यत्र मुचि कल्कन इत्येके, जान्तौ द्वौ प्रतियत्नः–संस्कारः, अर्जयति हिरण्यं निविशयतीत्यर्थः, विश्राणनं–विपचनम्, टान्तास्त्रयः, चेटति विचटति येऽन्यत्र हन्त्यर्था–हिंसार्थाः, [ते] चुरादौ वेदितव्याः, यथा हनंक् हिंसा–गत्योः, घातयति, हिसु तृहप् हिंसायाम्, हिंसयति तर्हयति तत् तत् गुणपाठसामर्थ्यात्तु हन्ति, हिनस्ति, तृणेढि, इत्यादयोऽप्यनेनैव च सिद्धेऽन्येषां हिंसार्थानां चुरादौ पाठ आत्मनेपदादिगतरूपभेदार्थः, अन्ये तु चट स्फुटौ घट् च हन्त्यर्था इत्याद्यं पाठं मन्यन्ते अस्यार्थः चट इत्ययं धातुः, आङः पूर्वश्च स्फुट इति, घट इत्ययं च त्रयोऽप्येते हिंसार्थाः सन्तश्चुरादौ पठन्ति, चाटयति,

१. णिचोऽनित्यत्वात् । २ हन्तेः प्रसिद्धयर्थाभिप्रायेण–एतत् तेन हनोर्गत्यर्थत्वेऽपि न तत्सङ्ग्रहः ॥

आस्फोटयति, घाटयति हन्तीत्यर्थः, णान्त एकः, तान्त एकः, निकारः–खेदनम्, उपस्कारे, यातयति छिद्रं राजा प्रच्छादयतीत्यर्थः, निरः परो यतिः प्रतिदानेऽर्थे चुरादिः, निर्यातयति ऋणं शोधयतीत्यर्थः, दान्ताः पञ्च, भाषा–भाषणं, भाषे आविष्कारे चार्थे, शब्दण् इत्ययं धातुरुपसर्गात् परश्चुरादिः, योगविभागोऽत्रेति नन्दी, शब्दण् उपसर्गादित्येकः, शब्दण् इत्ययं धातुरुपसर्गात् परश्चुरादिः, भाषाविष्कारयोरित्यपरः, अनुपसर्गार्थोऽयमारम्भः, पूर्वस्तु अभाषाविष्कारार्थः, क्षरणे इत्येके, आङः परः क्रन्दण् इत्ययं माततत्येऽर्थे चुरादिः, संवरणे इत्यन्ये, आङ्पूर्वात् स्वदतेः सकर्मकाण् णिज् भवति, अन्ये तु ग्रसण ग्रहणे, पुषण् धारणे, दलण् विदारणे, लोकृ तर्केति भासार्थो दण्डकः, पूरण् आप्यायने, स्वदण् संवरणे–इतिक्रमेण पठित्वा व्याख्यान्ति, ग्रसिमारभ्य आस्वदं–स्वदं अभिव्याप्य यो धातुः पठितः तस्मात् सकर्मक्रियावचनादेव णिज् भवति ततोऽकर्मकेभ्यो णिचो व्यावृत्तिः।

१७२ धान्तः—श्रृधण् प्रसहने।

१७३ पान्तः—कृपण् अवकल्कने।

१७४ भान्तः—जम्भुण् नाशने।

---

१ दरिद्रो नरः परस्यधनं यातयतीतिशेषः। २ ष्वदण् आस्वादने॥

१७५ मान्तः—अमण् रोगे ।

१७६–१७७ रान्तौ–चरण् असंशये, पूरण् आप्यायने ।

१७८ लान्त—दलण् विदारणे ।

१७९ वान्तः—दिवण् अर्दने ।

१८० शान्तः—पशण् बन्धने ।

अ०—अथ धान्त एकः, प्रमहनं–अभिभवः, अप्रसहन-मित्येके, अप्रसहनं–अमर्षः, पान्त एकः, अवकल्कनं–मिश्रीकरणं सामर्थ्यं च, अवकल्पन इत्येके, चन्द्रस्तु भूकृपौ द्वावप्य वकल्कने चिन्तन इति व्याख्यत् संभावयति, अवकल्कयति विचारयत्यर्थान्, भान्त एकः, मान्त एकः, रान्तौ द्वौ, अन्ये तु चरण संशय इति पठन्ति, विचारणा हि संशये सति भवतीति च प्राहुः, लान्त एकः, वान्त एकः, अतिपूर्वादेव णिजित्येके–अतिदेवयति, शान्त एकः, दन्त्योपान्त्योऽयमित्येके, अर्थान्तरे तु पषी बाधनस्पर्शनयोरिति मूर्धन्यान्तः तालव्यान्तो दन्त्यान्त्यश्च आचार्यभेदेन, पषते, पमति, पमते, पशति, पशते ॥

१८१–१८४ षान्ताः—पषण् बन्धने, पुषण् धारणे, घुषृण् विशब्दने आक्रन्दे, भूष अलङ्कारे ।

१८५–१९१ सान्ता,—तसुण् अलङ्कारे, ग्रसण् ग्रहणे,

जसण् ताडने, त्रमण् वारणे, वसण् स्नेहछेदावहरणेषु, ध्रसण् उत्क्षेपे, लसण् शिल्पयोगे ।

१९२ हान्तः—अर्हण् पूजायाम् ।

१९३ क्षान्तः—मोक्षण् असने ।

अ०—अथ षान्ताश्चत्वारः, पोषयत्याभरणंधारयतीत्यर्थः विशब्दनं-विशिष्टशब्दकरणं नानाशब्दनं वा, अविशब्दन इत्येके, अवघोषयति पापमपह्नुत इत्यर्थः, नायं ऋदित् इति कौशिकः, आङ्परो घुषि क्रन्देऽर्थे चुरादिः स्यात्, सान्ताः मस्र, जमण् हिंसायाम् इति पठितेऽप्यर्थभेदात् पुनरिहाधीतः, धारणे इति नंदी, ग्रहण इत्येके, त्रासयति मृगान् निराकरोतीत्यर्थः, स्नेहे वासयति वासं, छेदे वासयति वृक्षं, अवहरणे वासयत्यरीन्मारयतीत्यर्थः; उञ्छे इत्येके, लासयति दारु-भ्रमादिना तक्ष्णोतीत्यर्थः, लस् श्लेषण-क्रीडनयो रिति भ्वादौ पाठः, शिल्पयोगेऽपि णिज् भावार्थः, एवमन्यत्रापि, हान्त एकः क्षान्त एकः, षान्तोऽयमित्येके तालव्यान्त इति कौशिकः ॥

१९४ कान्तः—लोकृ तर्के ।

१९५-१९६ घान्तौ—रघु लघु ।

१ ध्रसण् उत्क्षेपे । २ शिल्पं-क्रियाकौशलम् ॥

२०३-२३५ चान्तः-लोचृ। छान्तः-विच्छ। जान्ताः-अजु तुजु पिंजु लजु लुजु भजु। टान्ताः-पट पुट लुट घट घट्ट। तान्तः-वृत। पुथ। नद। वृध। गुप धूप कुप। चीव। दशु कुशु। त्रसु पिसु कुसु दसु। वर्ह वृहु वल्ह अहु वहु महुण्। भासार्थाः।

## परस्मै भाषाः

अ०—अथ कान्तौ द्वौ, वर्णक्रमेण भाषार्थाः सर्वे, घान्तौ द्वौ, चान्त एकः, ठान्त एकः, जान्ताः षट्, टान्ताः पञ्च, घटण् संघात इति पठितोऽपि सकर्मकार्थमत्र विशेषार्थं च पुनरिहाधीतः, लोकृतर्कादयः स्वार्थेणिच मुत्पादयन्ति, तान्त एकः, थान्त एकः, दान्त एकः, धान्त एकः, पान्तास्त्रयः, वान्त एकः, शान्तौ द्वौ, सान्ताश्चत्वारः, हान्ताः षड् भाषार्थश्चेति पारायणं भासयति दिशो दीपयति-इन्धयति-प्रकाशयति गणान्तरपाठस्तु-एषामात्मनेपदार्थः॥

## इति परस्मैपदिनः॥

२३६-उदन्तः—युणि जुगुप्सायाम्।

१ अस्य चुरादौ पिजुण् हिंसा-बल-दान-निकेतनेषु प्राग्-पठितोऽप्यत्रार्थविशेषार्थः, आत्मनेपदार्थः, सकर्मकार्थश्चेति॥

२३७-ॠदन्तः—गॄणि विज्ञाने ।

अ०—अथ उदन्त एकः, ॠदन्त एकः, विज्ञापने- न्येके, कृणीति कारयते चन्द्रः ।

२३८-चान्तः-वञ्चिण् प्रलम्भने ।

२३९-टान्तः—कुटिण् प्रतापने ।

२४०-२४१ दान्तौ—मदिण् तृप्तियोगे, विदिण्[१] चेत- नाख्याननिवासेषु ।

२४२-नान्तः—मनिण् स्तम्भे ।

२४३-२४४ लान्तौ—वलि भलिण् आभण्डने[२] ।

२४५-वान्तः—दिविण् परिकूजने ।

२४६-पान्तः—वृषिण् शक्तिबन्धे[३] ।

२४७-२४८—क्षान्तौ—कुक्षिण् अवक्षेपे, लक्षिण् आलोचने ।

अ०—अथ चान्त एकः, प्रलम्भनं-मिथ्याफलाख्यानम्, टान्त एकः, दान्तौ द्वौ, तृप्तिशोधन इत्येके-तृप्तेः शोधनं-

१. अन्यत्र विदक् ज्ञाने वेत्ति, विदिंच् सत्तायाम् विद्यते, विद्लृंती लाभे विन्दति-विन्दते, विदिंप् विचारणे, विन्ते ।
२. निरूपणमित्यर्थः । ३. प्रजननसामर्थ्यमित्यन्ये ॥

संपत्तिः, वेदयते सुखं चेतयत इत्यर्थः, आवेदयते धर्मं आख्यायतीत्यर्थः, विवादेऽप्यन्ये प्रवेदयते वादिना, वेदयते गृहं निवासम्, नान्त एकः, स्तम्भो गर्वः, लान्तौ द्वौ, बलि-गोष्ठ्यादिः, वान्त एकः, षान्त एकः, आवर्षयते ग्रामः शक्तिं बध्नातीत्यर्थः, तवर्गतुर्यादिरयम्, सामर्थ्यवारणार्थं इत्येके-घर्षयते अरीन्, क्षान्तौ द्वौ, आत्मनेपदिन एवार्थान्तरेषु चुरादयः ॥

२४९–२५१ कान्ता—हिष्कि किष्किण् हिंसायाम्, निष्किण् परिमाणे ।

२५२ जान्तः—तर्जिण् संतर्जने ।

२५३–२५४—टान्तौ—कूटिण् अप्रमादे,त्रुटिण् छेदने।

२५५ ठान्तः—शठिण् श्लाघायाम् ।

२५६–२५८ णान्ताः—कूणिण् संकोचने, तूणिण् पूरणे, भ्रूणिण् आशंसायाम् ।

२५९–२६० तान्तौ—चितिण् वेदने, बस्तिण् अर्दने ।

२६१ धान्तः—गन्धिण् अर्दने ।

२६२–२६५ पान्ताः—डपि डिपि डम्पि डिम्पि सङ्घाते ।

२६६-२६७ भान्तौ—डम्भि डिम्भिण् सङ्घाते ।

२६८-२७० मान्ताः—स्यमिण् वितर्के, शमिण् आलोचने, कुस्मिण् कुस्मयने ।

२७१-२७३ रान्ताः—गूरिण् उद्यमे, तन्त्रिण् कुटुम्बधारणे, मन्त्रिण् गुप्तभाषणे ।

२७४ लान्तः—ललिण् ईप्सायाम् ।

२७५-२७६ शान्तौ—स्पशिण् ग्रहण-श्लेषणयोः, दंशिण् दशने ।

२७७-२७८ सान्तौ—दंसिण् दर्शने च, भर्त्सिण् तर्जने च ।

२७९ क्षान्तः—यक्षिण् पूजायाम् ।

आत्मने भाषाः ॥

अ०—अथ कान्तास्त्रयः, जान्त एकः, यत्तु लक्ष्ये तर्जयति तथा भर्त्सयति-निशामयति-भालयति-कुत्सयति-वञ्चयति-निवेदयतीत्यादौ परस्मैपदं दृश्यते तद् भ्वादौ राजृग् टुभ्राजि-इति पुनर्भ्राजिग्रहणेनात्मनेपदनित्यत्वज्ञापनात् सिद्धम् । टान्तौ द्वौ, अप्रदान इत्येके, डान्तोऽयमि-

१. त्रुटिण् ।

त्येके, ठान्त एकः, णान्तास्त्रय, आशङ्कायामित्यन्ये, तान्तौ द्वौ, धान्त एकः, पान्ताश्चत्वारः, भान्तौ द्वौ, मान्तास्त्रयः, कुत्सितं स्मयनं कुस्मयनमतिवृष्टौ, बुध्युत्प्रेक्षितेऽर्थे इत्यन्ये, रान्तास्त्रयः, कुटुम्बः-परिवारः, उपलक्षणं चैतत्, कुटुम्ब इत्यपि धातुरिति चान्द्रः कुटुम्बयते, लान्त एकः, शान्तौ द्वौ, सान्तौ द्वौ, चाद् दर्शने, क्षान्त एकः ॥

इत्यात्मनेपदिनः ॥

इतोऽदन्ताः ।

२८०-२८१ कान्तौ-अङ्कण् लक्षणे, श्लेष्कण् दर्शने ।

२८२-२८३ खान्तौ-सुख दुःखण् तत्क्रियायाम् ।

२८४ गान्तः-अङ्गण् पदलक्षणयोः ।

२८५ घान्तः-अघण् पादकरणे ।

२८६-२८७ चान्तौ-रचण् प्रतियत्ने, सूचण् पैशून्ये ।

२८८-२९१ जान्ताः-भाजण् पृथक्कर्मणि, सभाजण् प्रीतिसेवनयोः, लज लजुण् प्रकाशने ।

२९२-२९८ टान्ताः-कूटण् दाहे, पट वटुण् ग्रन्थे,

---

१ भ्रूणिण् ॥

खेटण् भक्षणे, खोटण् क्षेपे, पुटण् संसर्गे, वट्टुण् विभाजने ।

२९९–३०० ठान्तौ–शठ श्वठण् सम्यग्भाषणे ।

३०१–डान्तः–दण्डण् दण्डनिपातने ।

३०२–३०९ णान्ताः–व्रणण् गात्रविचूर्णने, वर्णण् वर्ण-क्रियाविस्तारगुणवचनेषु, पर्णण् हरितभावे, कर्णण् भेदे, तूणण् सङ्कोचने गणण् सङ्ख्याने, कुण गुणण् आमन्त्रणे ।

अ०–अथ इत उर्ध्वं युजादेः अदन्तत्वं धातूनां विधीयते, ततश्च अतः ( ४ । ३ । ८२ ), इत्यल्लुक् स्थानित्वाद् गुणवृद्धयोः समानलोपित्वाच्च मन्वद्भावदी-र्घोपान्त्यह्रस्वानामभावः, कान्तौ द्वौ, अङ्कादीनां तूक्त फलाभावेऽपि पूर्वाचार्यानुरोधेनादन्तेषु पाठः, णिजभा-वेऽनेकस्वरत्वाद्यङनिवृत्त्यर्थं इत्येके, द्रमिलास्त्वेवं प्रका-राणामदन्तत्वविधानसामर्थ्यात्–अल्लोपाभावं मन्यन्ते, णिज-भावेऽप्यदन्तत्वर्थस्य पाठस्तेनानेकस्वरत्वाद्यङ् न भवति, एवं सूत्रि रूक्षि गर्वि प्रभृतीनां पाठे प्रयोजनमुन्नेयम्, अनदन्ता एवैते इत्येके, खान्तौ द्वौ सुखनं दुखनं च तत्क्रिया, गान्त एकः, घान्त एकः, चान्तौ द्वौ, जान्ता-

---

१ वर्णयति कविः, सुवर्णं वर्णयति, इयं वर्णना, राजानं पर्णयति ।

श्चत्वारः, प्रीति-दर्शनयोरित्येके, टान्ताः सप्त आमन्त्रणे-ऽपीत्येके, ग्रन्थो वेष्टनं पटयति वेष्टयति इत्यर्थः, डान्तोऽयं-मित्येके, दान्तोऽयमित्येके, ठान्तो द्वौ, डान्त एकः, दण्डादेर्नाम्नो णिचि दण्डयतीत्यादिसिद्धौ दण्डणप्रभृतीनां पाठो यथाविधानं णिचं विनापि प्रयोगार्थः, अत एव अदन्तत्वमपि अनेक कार्यार्थं फलवत्, णान्ता अष्टौ, वर्णक्रिया वर्णनं वर्ण-करणं वा, गुणवचनं स्तुतिः शुक्लाद्युक्तिर्वा ॥

३१०-३१२ तान्ताः—केतण् आमन्त्रणे, पतण् गतौ वा, वातण् गतिसुखसेवनेषु ।

३१३-३१४ थान्तौ-कथण् वाक्यप्रबन्धे, श्रथण् दौर्बल्ये ।

३१५-३१६ दान्तौ-छेदण् द्वैधीकरणे, गदण् गर्जे ।

३१७ धान्तः—अंधण् दृष्ट्युपसंहारे ।

३१८-३२१ नान्ताः—स्तनण् गर्जे, ध्वनण् शब्दे, स्तेनण् चौर्ये, ऊनण् परिहारे ।

३२२-३२४ पान्ताः—कृपण् दौर्बल्ये, रूपण् रूप-क्रियायां, क्षपण् प्रेरणे ।

३२५ मान्तः—लाभण् प्रेरणे ।

---

१ सभाजण् । २ कूटण् । ३ खोटण् । ४ परोक्षमादेशोय-ङ्निवृत्त्यादि च ।

३२६–३३० मान्ताः—भामण् क्रोधे, गोमण् उपलेपने, सामण् मान्त्वने, श्रामण् आमन्त्रणे, स्तोमण् श्लाघायाम् ।

३३१ यान्तः—व्ययण् वित्तसमुत्सर्गे ।

३३२–३४३ रान्ताः—सूत्रण् विमोचने, मूत्रण् प्रस्रवणे, पारतीरण् कर्मसमाप्तौ, कत्र गात्रण् शैथिल्ये, चित्रण् चित्रक्रियाकदाचिद्दृष्ट्योः, छिद्रण् भेदे, मिश्रण् संपर्चने, वरण् ईप्सायाम्, स्वरण् आक्षेपे, शारण् दौर्बल्ये, कुमारण् क्रीडायाम् ।

३४४–३४८ लान्ताः—कलण् संख्यानगत्योः, शीलण् उपधारणे, वेल कालण् उपदेशे, पल्यूलण् लवनपवनयोः ।

३४९ शान्तः—अंशण् समाघाते ।

३५०–३५१ षान्ताः—पषण् अनुपसर्गः, गवेषण् मार्गणे, मृषण् क्षान्तौ ।

३५३–३५५ सान्ताः—रसण् आस्वादनस्नेहनयोः, वासण् उपसेवायाम्, निवासण् आच्छादने ।

३५६–३६० हान्ताः—चहण् कल्कने, महण् पूजायाम्, रहण् त्यागे, रहुण् गतौ, स्पृहण् ईप्सायाम् ।

३६१–क्षान्तः—रुक्षण् पारुष्ये ।

**परस्मैभाषाः ॥**

अ०—तान्तास्त्रयः, आमन्त्रणं–गूढोक्तिः, केतण् इत्ययं निश्रावणनिमन्त्रणयोरपीत्येके, वा शब्दो णिजदन्तत्वयोर्युग-द्विकल्पार्थः, सुखसेवनयोरित्येके। थान्तौ द्वौ, वाक्यप्रतिबन्ध इत्यन्ये, प्रतिबन्धः–विच्छेदः, उदीरणाद् वदन इत्यपरे, दान्तौ द्वौ, गर्जो मेघशब्दः, धान्त एकः, णान्ताः पञ्च, पान्तास्त्रयः, रूपक्रिया–राजमुद्रादिरूपस्य करणं रूपदर्शनं वा रूपक्रिया, भान्त एकः, मान्ताः पञ्च, सान्त्वनं–प्रीणनम्, यान्त एकः, वित्तसमुत्सर्गः–त्यागः, गतावित्येके, वित्तेति धात्वन्तरमित्येके वेत्तयति, रान्तास्त्रयोदश, विमोचनं–मोचनाभावः–ग्रन्थनमिति यावत्, अयं कर्तणित्येके, चन्द्रस्तु कर्तृणिति ऋदन्तं मन्यते, कत्थणिति देवनन्दी, चित्रयति–आलेख्यं करोति कदाचित् पश्यति वेत्यर्थः, संपर्चनं–श्लेषः, तालव्यादिः, लान्तोऽयमित्येके, लान्ताश्चत्वारः, उपधारणमभ्यासः परिचयो वा, कालोपदेश इत्यर्थे निर्देश इत्येके, पल्यूलयति क्षेत्रसबु सधान्यं वा, पल्लयूलेत्येके, वल्यूलेत्यन्ये, पथ्यूलेत्यपरे, शान्त एकः, समाघातो विभजनम्, षान्तास्त्रयः, पषण् इत्ययं धातुरनुपसर्गोऽदन्तो णिचमुत्पादयति, गत्यर्थेऽयमित्येके, केचित्तु इमं तालव्यान्तमधीत्य व्याचक्षते पशेति धातुः, अर्थनिर्देशाद् भ्वादिश्चुरादिरनुपसर्गः, चुरादिरदन्तः, तालव्यान्त एव वा अदन्त इत्यन्ये पशयति पाशयति,

---

१. पतण् गतौवा। २ वातण्। ३ कर्त। ४ कुमारण्॥

क्षान्तिस्तितिक्षा, सान्तास्त्रयः, हान्ताः पञ्च, कल्कनं–दम्भः, क्षान्त एकः ॥

इति परस्मैपदिनः ॥

३६२–गान्तः—मृगणि अन्वेषणे ।

३६३–थान्तः—अर्थणि उपयाचने ।

अ०—अथ गान्त एकः, थान्त एकः, पूर्वाचार्यानुरोधाद दन्तेष्वस्य पाठः, एवं मति गर्व्योरपि, केचित्त्वदन्तबलादु-अतो लुकं बाधित्वाऽनुपान्त्यस्यापि ञ्णिगनि (५।३।५०), इति वृद्धौ अर्त्तिरीब्लीह्रीक्नुविक्ष्माय्यातां पुः (४। २। २१), इति पात्रर्थापयते गर्त्रापयत इत्याहुः ।

३६४–दान्तः—पदणि गतौ ।

३६५ मान्तः—संग्रामणि युद्धे ।

३६६–३६८ रान्ताः—शूर वीरणि विक्रान्तौ, सत्रणि सन्दानक्रियायाम् ।

३६९ लान्तः—स्थूलणि परिबृंहणे ।

३७० वान्तः—गर्वणि माने ।

३७१-३७२ हान्तौ—गृहणि ग्रहणे, कुहणि विस्मापने।

इत्यात्मनेभाषाः ॥

अ०—अथ दान्त एकः, मान्त एकः, संग्रामणि परस्मैपदीत्येके, रान्ताः संतानक्रियायामित्येके, लान्त एकः, परिबृंहणं-पीनत्वं, वान्त एकः, हान्तौ द्वौ, अवसिता अदन्ताः ॥

इत्यात्मनेपदिनः ॥

३७३ युजण् संपर्चने।

३७४-३७६ इदन्ताः—लीण् द्रवीकरणे, मीण् मतौ, प्रीगण् तर्पणे।

३७७ उदन्तः—धूगण् कम्पने।

३७८ ऋदन्तः—वृगण् आवरणे।

३७९ ॠदन्तः—जॄण् वयोहानौ।

अ०—अथ विकल्पितणिचो युजादयः, इह युजादीनां नियतो णिज्विकल्पः, चुरादीनां तु यथादर्शनं णिजनित्य इत्यु-

---

१. अदन्तत्वं च सुखादीनां णिच सनियोगे एव द्रष्टव्यम् तेन णिजभावे जगणतुः जगणिथेत्यत्रानेकस्वरत्वाद् आम् न, अङ्कश्लेष्कयोस्तु फलाभावात् सुखादीनामित्युक्तम्, अदन्तमध्ये-पाठस्तु पूर्वाचारात् ॥

त्कमेव, इदन्तास्त्रयः, मतिर्मननम्, गतावित्यन्ये, गित्वस्य णिजभावे फलवत्कर्त्तर्यात्मनेपदार्थत्वाद्, एवमुत्तरयोरपि, उदन्त एकः, ऋदन्त एकः, ॠदन्त एकः ॥

३८०-३८१ कान्तौ--चीक शीकण् आमर्षणे ।

३८२ गान्तः--मार्गण् अन्वेषणे ।

३८३-३८६ चान्ताः--पृचण् संपर्चने, रिचण् वियोजने च, वचण् भाषणे, अर्चिण् पूजायाम् ।

३८७-३८८ जान्तौ--वृजैण् वर्जने, मृजौण् शौचालङ्कारयोः ।

३८९ ठान्तः--कठुण् शोके ।

३९०-३९४ थान्ताः-श्रन्थ ग्रन्थण् संदर्भे, क्रथ अर्दिण् हिंसायाम्, श्रथण् बन्धने च ।

३९५-३९८ दान्ताः-वदिण् भाषणे, छदण् अपवारणे, आङः मदण् गतौ, बृदण् संदीपने ।

३९९ धान्तः-शुंधिण् शुद्धौ ।

४००-४०१ नान्तौ-तनूण् श्रद्धाघाते उपसर्गाद् दैर्घ्ये, मानण् पूजायाम् ।

४०२-४०४ पान्ताः-तपिण् दाहे, तृपण् प्रीणने, आप्लृण् लम्भने ।

४०५ भान्तः–दृभैण् भये ।

४०६ रान्तः–इरण् क्षेपे ।

४०७–४१० षान्ताः–मृषिण् तितिक्षायाम्, शिषण असर्वोपयोगे विपूर्वो अतिशये, जुषण् परितर्कणे, धृषण् प्रसहने।

४११ सान्तः–हिसुण् हिंसायाम्।

४१२–४१३ हान्तौ–गर्हण् विनिन्दने, षहण् मर्षणे ।

परस्मैभाषाः ॥

बहुलमेतन्निदर्शनम् । वृत्युजादिः परस्मैभाषाः ॥

इत्याचार्य श्री हेमचन्द्रानुस्मृतौ चुरादयो णितो धातवः ॥

अ०–अथ कान्तौ द्वौ, शीकिस्तालव्यादिः, गान्त एकः, चान्ताश्चत्वारः, चात् सम्पर्चने, संदेशन इत्येके, इदित्वात् पक्षे आत्मनेपदम्, जान्तौ द्वौ, ठान्त एकः, थान्ताश्चत्वारः, संदर्भो बन्धनं, अथ लाघवार्थं थान्तमध्य एवार्थानुगुण्येन दान्तः, इदित्वस्य णिजभावे आत्मनेपदेन सार्थकत्वाण्णिचि शेषात् (३ । ३ । १००), इति परस्मैपदे–अर्दयति चाद् हिंसायाम्। दान्ताश्चत्वारः, मोक्षण इत्येके, संदेशन इत्यन्ये, इदित्वं णिजभावे–आत्मनेपदार्थं कूजने घटादित्वात् छादयति, आङ्परः

सद्-इत्ययं गतौ युजादिः, धान्त एकः, शुन्धिण् अनिदित्येके, नान्तौ द्वौ, श्रद्धोपकरणयोरित्येके, उपसर्गपूर्वस्तनू दीर्घेऽर्थे युजादिः, अयं मनणित्येके, पान्तास्त्रयः, इदित्वं पक्षे-आत्मनेपदार्थं, तृपण् संदीपन इत्यन्ये, भृतण् दृपण् संदीपन इत्येके, लम्भनं-प्राप्तिः, भान्त एकः, रान्त एकः, क्षेपः-प्रेरणं, गताबित्येके, पान्ताश्चत्वारः, इदित्वं पक्षे-आत्मनेपदार्थं, मृषण् क्षान्तावदन्तो मृषति णिचोऽनित्यत्वाद्-अदन्तत्वाद् गुणः, अर्चि अर्दि शुधि तपि वदि मृषयः षडपि परस्मैपदिनः-इति भीमसेनीया अमर्षोपयोगः-अनुपयुक्तः, विपूर्वः शिथिरतिशये-अतिशयः-उत्कर्षः, परितर्पण् इत्येके, प्रमहनं-अभिभवः, अथ मान्त एकः, हान्तौ द्वौ ॥

## इति परस्मैपदिनः ॥

यदेतद् भवत्यादिधातुपरिगणनं तद् बाहुल्येन निदर्शनत्वेन ज्ञेयम्, तेनात्रापठिता अपि क्विप्रभृतयो लौकिकाः स्तम्भू प्रमुखाः सौत्राश्चुलुम्पादयश्च वाक्यकरणीया धातव उदाहार्याः, यद्वा भ्वादिगणाष्टकोक्ताः स्वार्थणिजन्ता अपि बहुलं भवन्ति, चुरादिपाठस्तु निदर्शनार्थः-यदाहुः—

१. चुरादयो धातवोऽपरिमिताः किल सन्ति, नास्ति तेषामियत्ता, अतो यथालक्ष्यमनुसर्त्तव्याः, अत एव चन्द्रगोमीनामा वैयाकरणश्चुरादिगणस्यापरिमिततया परमार्थतो यथालक्ष्यमनुसर-

' निवृत्तप्रेषणाद् धातोः प्रकृतेऽर्थे णिजिष्यते '-यथा रामो राज्यमकारयद्-अकरोदित्यर्थः, रञ्जयति भेदयति घातयति तापयति वाहयति वाचयति-इत्याद्यपि स्वार्थे सिद्धम् ॥

इति णितश्चुरादयः ॥

संवत् १५०१ वर्षे वैशाख शुद ३ दिने जयवीरगणिनाऽलेखि भुवनगिरौ सोमवासरे स्वपरोपकृते ॥

अवचूरिसहितोहैमधातुपाठः समाप्तः

---

णमवगम्य द्वित्रानेव चुरादिधातुन् पठितवान्नतुभूयस इति ।

यैः प्रज्ञायानपात्रेण तीर्णः स्याद्वादसागरः ।
तेषां श्रीलब्धिसूरीणां पादपद्मनिषेविणा ॥ १ ॥

ग्रन्थस्य गौरवं ज्ञात्वा मया विक्रमभिक्षुणा ।
अध्येतृसुखबोधार्थं संन्यस्तं लघुटिप्पणम् ॥ २ ॥ युग्मम्

क्व शास्त्रस्यातिदौर्ग्राह्यं क्व मे संवित्तिमन्दिमा ।
कृपालेशं गुरोः प्राप्य ग्रन्थः संशोधितो मया ॥ ३ ॥

# परिशिष्टानि ।

समाहकः–

विक्रमविजयो मुनिः ।

# प्रथमं परिशिष्टम्

## श्री हर्षकुलगणिविरचितानि

## धातुस्थितानुबन्धफलानि ।

आदौ वक्ष्येऽनुबन्धानां सर्वधातुनिवासिनाम् ।
फलानि तेष्वकारः स्यात् सुखोच्चाराय जीववत् ॥ १ ॥

आकार आदित इतीट् निषेधाय क्तयोर्भवेत् ।
मिन्नवद्धेट्निषेधादिहेतुश्चारम्भभावयोः ॥ २ ॥

प्रमेदितः प्रमन्नश्च यथा मिन्नं च मेदितम् ।
अनेनेति नवा भावारम्भ इत्यत्र कीर्त्तितः ॥ ३ ॥

इकार इङितः कर्त्तर्यात्मनेपदसूचकः ।
एधतेवदीकारस्तु व्यक्तोभयपदात्मकः ॥ ४ ॥

ईगितस्सूत्रनिर्दिष्टो यजते यजतीतिवत् ।
उति स्वरान्नन्दतिवन्नोऽन्त इत्युदितः स्वरात् ॥ ५ ॥

---

१. जीव प्राणधारण इत्यत्राकारवदिति भावः । २. आदितः (४ । ४ । ७१) इत्यनेन क्तयोरादिरिण् न स्यात् । ३. नवा भावारम्भे (४ । ४ । ७२) इत्यनेन क्तयोरादिरिड् वा न स्यात् । ४. इङितः कर्त्तरि (३ । ३ । २२) इत्यनेन कर्त्तयात्मनेपदं स्यात् । ५. ईगितः (३ । ३ । ९५) इत्यनेन फलवति कर्त्तयात्मनेपदं स्यात् ।

अङ्क्त्वाऽश्वित्वाचदूः क्त्वायाम्[1]ूदितो वेति वेट्फलः ।
अचख्वाददुपा[2]न्त्यस्येत्युपान्त्यह्रस्वनाश ऋत् ॥ ६ ॥

ऋकारोऽदर्शदद्राक्षीद् [3]ऋदिच्छ्वीत्यङ्विकल्पकृत् ।
लृ[4]दिद्द्युतादीत्यङ्सूची लृत्परस्मैपदेऽगमत् ॥ ७ ॥

न[5] श्व्यादि सिच्येदिद् वृद्धेरभावायाह्सीदिव ।
इडभावः क्तयोरैदित् डीयँ[6]श्व्यैदीति चित्तवत् ॥ ८ ॥

सूँ[7]यत्येति क्तयोस्तो न ओदिति स्यात्प्रवाणवत्
धूँ[8]गौदीत्यशिति स्तादौ वेट् क्षान्ता क्षमितावदौत् ॥ ९ ॥

---

१. ऊदितो वा ( ४ । ४ । ४२ ) इत्यनेन क्त्व आदिरिट् वा स्यात् । २. उपान्त्यस्यासमानलोपिशास्वृदितो ङे ( ४ । २ । ३५ ) इत्यनेन धातोरुपान्त्यस्य ङपरे णौ ह्रस्वः स्यात् । ३. ऋदिच्छ्विस्तम्भूम्रुचुम्लुचुग्रुचुग्लुचूग्लुंचूज्रा वा ( ३ । ४ । ६५ ) इत्यनेन परस्मैपदेऽङ् वा स्यात् । ४. लृदिद्द्युतादिपुष्यादेः परस्मै ( ३ । ४ । ६४ ) इत्यनेन परस्मैपदेऽङ् स्यात् । ५. न श्विजागृशसक्षण ह्येदितः ( ४ । ३ । ४९ ) इत्यनेन परस्मैपदे सेटि सिचि वृद्धिर्न स्यात् । ६ डीयश्व्यैदितः क्तयोः ( ४ । ४ ।६१) इत्यनेन क्तक्तवत्वोरादिरिट् न स्यात् । ७. सूयत्याद्योदितः ( ४ । २ । ७० ) इत्यनेन क्तयोस्तो नकारः स्यात् । ८. धूगौदितः ( ४ । ४ । ३८ ) इत्यनेन इड् वा स्यात् ।

[1]एकस्वरादिति स्ताद्यशिति स्वादिडभावकृत् ।
अनुस्वारः प्रवातावत्स्वरेत इति संस्थिताः ॥ १० ॥

अदादिज्ञापकः कः शित्यत्र न प्रत्ययोऽस्तिवत् ।
[2]कर्त्तर्यनद्भ्य इत्युक्तेर्यङ्लुबन्ता अदादिवत् ॥ ११ ॥

स्याद् गित्युभयतो भाषा करोति कुरुते यथा ।
[3]ईगीति ङिति गातेवदिङिँतेत्यात्मनेपदम् ॥ १२ ॥

दिवाद्यावेदकश्चोऽत्र दि[5]वादेः श्यः स्यतीतिवत् ।
[6]ज्ञानेच्छार्चेति ञीति क्तः सत्यर्थे मिन्नरूपवत् ॥ १३ ॥

स्वादिसूची टकारोऽत्र [7]स्वादेः श्नुः स्याद्धिनोतिवत् ।
ङ्यर्थः स्तनंधयीत्यादौ [8]ट्धेमत्राणञेति टित् ॥ १४ ॥

---

१. एकस्वरादनुस्वारेतः ( ४ । ४ । ५६ ) इत्यनेन इट् निषेधो भवति २. कर्त्तर्यनद्भ्यः शव् ( ३ । ४ । ७१ ) इत्यनेन अदादेः शव् न स्यात् । ३. ईगितः ( ३ । ३ । ९५ ) इत्यनेन फलवति कर्त्तर्यात्मनेपदं भवति । ४. इङितः कर्त्तरि (३ । ३ । २२) इत्यनेन कर्त्तर्यात्मनेपदं स्यात् । ५. दिवादेः श्यः (३ । ४ । ७२) इत्यनेन श्यो भवति । ६. ज्ञानेच्छार्चार्थञीच्छील्यादिभ्यः क्तः ( ५ । २ । ९२ ) इत्यनेन ञिद्भ्यः क्तः स्यात् । ७. स्वादेः श्नुः ( ३ । ४ । ७५ ) इत्यनेन श्नुः स्यात् । ८. अणञेयेकण् नञ् स्नञ्टिताम् (२ । ४ । २०) इत्यनेन टित्त्वात् ङीः स्यात् ।

द्वितोऽथुरित्यनेन स्यादथुर्नंदथुवत् द्विति ।
ड्विति कृत्रिमवद्ज्ञेयो ड्वितस्त्रिमगिति त्रिमक् ॥ १५ ॥

णः स्याच्चुरादये तत्र णिच् चुरादिभ्य ईरयन् ।
म एव इंण इत्यादाविंण्क्धातौ विशेषकृत् ॥ १६ ॥

तनुबन्धस्तुदाद्यर्थस्तुदादेः शस्तुदामिवत् ।
रुधाद्यर्थं पिदत्र श्नो रुधां स्वराद् रुणद्धिवत् ॥ १७ ॥

बवयोरेकता कान्ता दाम् दान इति मिद् भवेत् ।
श्रौत्यादिष्वऽन्यदामंज्ञानिषेधायेव यच्छति ॥ १८ ॥

तनादये य उस्तत्र कृग्तनादेस्तनोतिवत् ।
दासंज्ञाभावकृद् वः स्यादवौदेत्यवदाततवत् ॥ १९ ॥

१. द्वितोऽथुः ( ५ । ३ । ८३ ) इत्यनेन अथुः स्यात् । २. ड्वितस्त्रिमक्तत्कृनम ( ५ । ३ । ८४ ) इत्यनेन त्रिमक् स्यात् । ३. चुरादिभ्योणिच् ( ३ । ४ । १७ ) इत्यनेन णिग्भवति । ४. इणः ( २ । १ । ५१ ) इत्यनेन इण्क् गृह्यते । ५. तुदादेः शः (३ । ४ । ८१) इत्यनेन शः स्यात । ६. रुधां स्वराच्छ्नो नलुक्च ( ३ । ४ । ८२ ) इत्यनेन श्नः स्यात् । ७. श्रौतिकृवु-धिवुपाघ्राध्मास्थाम्नादामृदृश्यर्तिशदसदः शृकृधिपिबजिघ्रधमतिष्ठ-मनयच्छपश्यच्र्छेशीयसीदम् ( ४ । २ । १०८ ) इत्यत्र दाम् इति मिद् ग्रहणाद् विद् दोसंज्ञको न गृह्यते । ८. कृग्तनादेरुः ( ३ । ४ । ८३ ) इत्यनेन तनादे रुः स्यात् । ९. अवौदाधौ दा ( ३ । ३ । ५ ) इत्यनेन दासज्ञा स्यात् ।

शित् क्र्यादिज्ञापकोऽत्र श्ना क्र्यादेः[1] क्रीणातिवद् भवेत् ।
षनुबन्धोऽङ्प्रत्यया क्षमावत् स्यात्षितोऽङिति[2] ॥ २० ॥

व्यञ्जनेत इति प्रोक्ताः कण्ड्वादेर्यगसूयते[3] ।
भ्वादयः शब्विकरणा उत्सर्गेणाच्छेतीतिवत् ॥ २१ ॥

१. क्र्यादे. ( ३ । ४ । ७९ ) इत्यनेन श्ना भवति । २. षितोऽङ् ( ५ । ३ । १०७ ) इत्यनेन अङ् स्यात् । ३. धातोः कण्ड्वादेर्यक् ( ३ । ४ । ८ ) इत्यनेन यक् स्यात् ।

# द्वितीयं परिशिष्टम्

## श्री हर्षकुलगणिविरचिताः

### कण्ड्वादयः

नवादिभ्योऽतिरिक्ता ये सूत्रेष्वेवोपलक्षिताः ।
सुखज्ञानार्थमुच्यन्ते केऽपि ते सौत्र धातवः ॥ १ ॥

सुगमम् । नवरं, 'सूत्रेष्वेवोपलक्षिता' इति । सूत्रेषु लक्षणसूत्रेष्वेव उपलक्षिता दृष्टा न धातुपाठे ॥ १ ॥

कण्डूग् गात्रविनामे महीङ् वृद्ध्यर्चयोर्हृणीङ् रोषे ।
लज्जायामपि मन्तु तु रोषार्थे वैमनस्येऽपि ॥ २ ॥

कण्डूग् गात्रविनामे " धातोः कण्ड्वादेर्यक् " ॥३।४।८॥ कण्ड्वादयो द्विधा । धातवो नामानि च । तत्र धातुभ्यो यक् प्रत्ययः । कण्डूयति, कण्डूयते । क्ये, कण्डूयते । अकण्डूयीत् । अकण्डूयिष्ट । अकण्डूयि । कण्डूयांचकार । कण्डूयांचक्रे । कण्डूयिता । " कण्ड्वादेस्तृतीयः " ॥ ४ । १ । ९ ॥ इति तृतीयावयवस्य द्वित्वे, कण्डूयियिषति; कण्डूयियिषते । णिगि, कण्डूययति । ङे. अकण्डूययत्; अत्र " अतः " ॥४।३।८२॥ इति विषयेऽप्यल्लोपात् " स्वस्य परे प्राग्विधौ" ॥७।४।११०॥ इति स्थानित्वाभावाद् यि इत्यस्य द्वित्वम्; न तु य इत्यस्य द्वित्वम् । एवमन्यत्रापि । कण्डूयित्वा । कण्डूयिता । कण्डूयितुम् । प्रकण्डूय्य । १ । महीङ् वृद्ध्यर्चयोः । ङकार आत्मनेपदार्थः ।

महीयते । अमहीयिष्ट । महीययति । अमहीयियत् । महीयिता । २ । हृणीङ् रोषे लज्जायामपि । हृणीयते । 'कथं न पत्या धरणी हृणीयते' । सनि, हृणीयियिषते । णिगि, हृणीययति । ३ । मन्तु तु रोषार्थे वैमनस्येऽपि । मन्तूयति । मन्तूयियिषति । णिगि, मन्तूययति अद्यतन्यां, अमन्तूयीत् । ४ ॥ २ ॥

असु मानसोपतापे वल्गु तु माधुर्यपूजयोः ख्यातः ।
वेङ्, लाङ्, वेट्, लाट् धौर्त्येऽप्यस्वप्ने पूर्वभावेऽपि ॥ ३ ॥

असु मानसोपतापे । असूयति । अन्ये तु असूङ् दोषाविष्कृतौ रोषे । असूयते, इत्याहुः । असूयियिषति । आसूयीत् । णिगि, असूययति । ङे, आसूयियत् । ५ । वल्गु तु माधुर्यपूजयोः । वल्गूयति । अद्यतन्यां, अवल्गूयीत् । वल्गूयांचकार । ६ । 'वेङ्, लङ्, वेट्, लाट् धौर्त्येऽस्वप्ने पूर्वभावेऽपि' । आद्ययोर्द्वयोर्ङकार आत्मनेपदार्थः । वेयते । लायते । कण्ड्वादेस्तृतीयावयवस्य द्वित्वे, वेयियिषते लायियिषते । अवेयिष्ट । अलायिष्ट । वेयांचक्रे । लायांचक्रे । ८ । वेट्, वेट्यति । लाट्, लाट्यति ॥ १० ॥ ३ ॥

अल्पार्थकुत्सयोर्लिट् लोट् दीप्तौ इरज इरम ईर्ष्यार्थौ ।
भिष्णज उपसेवायां भिषज् चिकित्सार्थ उरम ऐश्वर्ये ॥ ४ ॥

अल्पार्थकुत्सयोर्लिट् । लिट्यति । यक्प्रत्ययस्य क्त्वािन्न गुणः । ११ । लोट् दीप्तौ । लोट्यति । लोटियिषति । लोटिषिषति । लोटियता । लोटिता । "क्यो वा" ॥ ४ । ३ ।८१ ॥

इति यकूलोपमपि विकल्पेनेच्छन्ति केचित् । १२ । इरज, इरस, ईर्ष्यार्थौ । इरज्यति । इरस्यति । १४ । भिष्णज् उपसेवायाम् । भिष्णज्यति; उपसेवते इत्यर्थः । १५ । भिषज् चिकित्सार्थे । भिषज्यति । अयं कुत्सायामित्यन्ये । १६ । उरस ऐश्वर्ये । उरस्यति । उरसिसिषति । १७ ॥ ४ ॥

नन्द समृद्धौ कुषुभ क्षेपे संभूयस प्रभूतार्थे ।
इयसेसमौ तु धातू ईर्ष्यायां पुष्प सन्तोषे ॥ ५ ॥

नन्द समृद्धौ । नन्द्यति । नन्दिता । " क्यो वा " ॥ ४।३।८१॥ इति यकूलोपस्यापि केषांचिन्मते विकल्पत्वात्; नन्दियता । १८ । कुषुभ क्षेपे । कुषुभ्यति । " अतः" ॥ ४ । ३ । ८२ ॥ इत्यल्लुक्; कुषुबिभिषति । कुषुभिता । कुषुभ्यिता । कुषुभ्यांचकार । " क्यो वा " ४ । ३ । ८१ ॥ इति यकोऽपि लोपे,कुषुभांचकार । कुषुभ्यितः । कुषुभितः । कुषुभ्यित्वा । कुषुभित्वा । कुषुभ्यितुम् । कुषुभितुम् । १९ । संभूयस प्रभूतार्थे । संभूयस्यति शस्यम्; वर्षति देवे प्रभूतं भवतीत्यर्थः । असंभूयसीत् । संभूयियसिषति । संभूयस्यित्वा । संभूयसित्वा ।२०। इयसेसमौ तु धातू ईर्ष्यार्थौ । इयस्यति । इसस्यति । २२ । पुष्प सन्तोषे । पुष्पति । २३ ॥ ५ ॥

उषस प्रभातवाच्ये रेषा चित्रेऽथ पर्यसिति प्रसवे ।
वेला समायार्थे स्याचरण गतावगद तन्त्रार्थः ॥ ६ ॥

उषस प्रभातवाच्ये; प्रभातार्थे इत्यर्थः । उषस्यति रात्रिः; प्रभातीभवतीत्यर्थः। रेषा चित्रे । रेषायति; चित्रं करोतीत्यर्थः । २५ । पयसिति प्रसवे । पयस् इति धातुः प्रसवे, उत्पत्तौ । पयस्यति गौः । पयः प्रसूते इत्यर्थः । वेला समयार्थे । वेलायति चैत्रः; कालबिलम्बं करोतीत्यर्थः । २७ । चरण गतौ । चरण्यति; गच्छतीत्यर्थः । २८ । अगद तन्त्रार्थः । तन्त्रमौषधं तस्यार्थे । अगद्यति; औषधं करोतीत्यर्थः । २९ ॥ ६ ॥

तिरस तरण प्रसिद्धौ दुवस तु परितापपरिचरणयोः स्यात् ।
कुसुभ क्षेपेऽथैला केला खेला विलासार्थाः ॥ ७ ॥

तिरस तरण प्रसिद्धौ । तिरस तरण एतौ द्वौ प्रसिद्ध्यर्थे। तिरस्यति । तरण्यति; प्रसिद्धो भवतीत्यर्थः । ३१ । दुवस् तु परितापपरिचरणयोः । दुवस्यति । ३२ । कुसुभ क्षेपे । कुसुभ्यति; क्षिपतीत्यर्थः । स्वदेहाश्रयां परकर्तृकां निरोधक्रिया मनुभवतीत्यर्थ इत्यन्ये । ३३ । एला केला खेला विलासार्थाः । एलायति, केलायति, खेलायति च; विलसतीत्यर्थः । एलायियिषति । ङ, ऐलायियत् । एलायांचकार । केलायियिषति । अकेलायियत् । केलायांचकार । केलायित्वा । प्रकेलाय्य इत्यादि । ३६ ॥ ७ ॥

मेधा आशुग्रहणे मगध तु परिवेष्टने ममर युद्धे ।
सुख दुःख तत्क्रियायां विख्यातौ भुरण पुरण गतौ॥८॥

मेधा आशुग्रहणे । मेधायति । ३७ । मगध तु परि-

वेष्टने । मगध्यति । मगध्यिता । मगधकः । ३८ । समर युद्धे । समर्यति; युद्धं करोति । ३९ । सुख दुःख तत्क्रियायाम् । सुख्यति; सुखीभवतीत्यर्थः । ४० । दुःख्यति; दुःखीभव तीत्यर्थः । ४१ । क्षुरण पुरण गतौ । क्षुरण्यति । पुरण्यति । ४३ । ८ ॥

भरण तु धारणपोषणयुद्धेष्वथ चुरण चौर्यचेतनयोः ।
इषध शरधारणार्थे तन्तस पम्पस तु दुःखार्थौ ॥ ९ ॥

भरण धारणपोषणयुद्धेषु । भरण्यति । ४४ । चुरण चौर्यचेतनयोः । चुरण्यति । ४५ । इषध शरधारणार्थे । इषध्यति । इषधिता । इषदिधिषति । ४६ । तन्तस पम्पस तु दुःखार्थौ । तन्तस्यति । पम्पस्यति । तन्तसांचकार । पम्पसांचकार । "योऽशिति" । ४ । ३ । ८० ॥ इति यलोपः । ४७ ॥ ९ ॥

गद्गद वाक्यस्खलने त्वरार्थकस्तुरण सपर पूजायाम् ।
पञ्चाशदमी कण्ड्वादयः परेऽनर्थका नोक्ताः ॥ १० ॥

गद्गद वाक्यस्खलने । गद्गद्यति । गद्गदङ् इत्येके । तन्मते गद्गद्यते । ४८ । त्वरार्थकस्तुरण । तुरण्यति; त्वरते- इत्यर्थः । सपर पूजायाम् । सपर्यति । "शंसिप्रत्ययात्" ॥ ५ । ३ । १०५ ॥ इत्यङि; सपर्या । एते पञ्चाशत् कण्ड्वादयो धातव उक्ताः ॥ परेऽन्ये उरण गोधादयः केचित् कण्ड्वादयोऽनर्थका नोक्ताः; अनुक्तार्थत्वान्न कथिता इत्यर्थः ॥१०॥

# तृतीयं परिशिष्टम्

## सौत्रा धातवः

१ स्तम्भू स्तम्भे[1] । २ आदन्तः तन्द्रा[2] आलस्ये । ३–६ इदन्ताः किं[3] ज्ञाने, पँति[4] पतने, गृँहि[5] ग्रहणे, चिँरिट्[6] हिंसा-

---

१. स्तम्भादयः सौत्रा इति वृद्धोक्तेरस्यादौ पाठः, स्तम्भः–क्रियानिरोधः, 'स्तम्भूस्तुम्भूस्कम्भूस्कुम्भूस्कोःश्नाच'(३-४-७८) इति सूत्रोपात्तः, तेन स्तभ्नो–स्तभ्नाति ।

२. शीङ्श्रद्धानिद्रातन्द्रादयिपतिगृहिस्पृहेरालुः (५-२-३७) इति सूत्रोपात्तादालुप्रत्ययेन तन्द्रालुरिति कृदन्तरूपम्, तिङन्ते तु नन्द्रातीति ।

३. जनिपणिकिजुभ्यो दीर्घश्च (१४०) इत्युणादिसुत्रोपात्तेनानेन टप्रत्यये दीर्घे च कीट इति कृदन्त रूपम्, तिङन्ते तु कयतीति ।

४. ५–२–३७, इति संख्याककृदन्तसूत्रोपात्तः ।

५. अनेनैव सूत्रोपात्तः ।

६. चिरेरिटो भ् च (१४९) इत्युणादिसूत्रोपात्तेनानेन इट्ट प्रत्यये भे चान्तादेशे, जातेरयान्तनित्यस्त्रीशूद्रात् (२–४ ५४) इति ङ्यां चिर्भिटी, तिङन्ते तु चिरिणोतीति ।

याम् । ७–८ उदन्तौ जुं वेगे, क्रुङ् गतौ। ९ ऊदन्तः भूङ् प्राप्तौ । १०–१६ कान्ताः तर्क विचारे, कक्क कर्क हासे, सिर्के सेचने। मर्क संप्रच्छने, चँङ्कि भ्रमणे, मर्कि गतौ। १७ खान्तः रिखि लिखेस्तुल्यार्थे। १८ गान्तः कंगे मिथःसंप्रहारे । १९ घान्तः अर्घ मूल्ये । २० चान्तः मँचंण् शब्दे ।

१. १४०. इति संख्याकोणादिसूत्रोपात्तः ।

२. कृत विकृतस्य क्रव्यम्, इति नैरुक्तोपात्तः । अनेन क्रव्यं–मांसम् ।

३. भूङः प्राप्तौ णिङ् ( ३–४–१९ ) इति सूत्रोपात्तः ।

४. कर्के रारुः ( ८१३ ) इत्युणादिसूत्रोपात्तेनानेनारु प्रत्यये कर्कारुः–क्षुद्रचिर्भटी ।

५. पृषिरञ्जिसिकिकालावृभ्यः कित् ( २०८ ) इत्युणादि सूत्रोपात्तेनानेनाते प्रत्यये सिकताः–वालुकाः ।

६. दिव्यविश्रु० (१४२) इत्युणादिसूत्रोपात्तेनानेनाटे मर्कटः।

७. वाश्यसिवासिमसि० ( ४२३ ) इत्युणादिसूत्रोपात्तेनानेनोरे प्रत्यये चक्रुरो–रथः ।

८. कंकिमकि० ( २४५ ) इत्युणादिसूत्रोपात्तेनानेनान्दे प्रत्यये मकन्दः–नृपः ।

९. कगेवनू० ( ४–२–४२ ) इति सूत्रोपात्तः ।

१०. भीण् शलि वलि कल्यति मर्च्यर्चि० ( २१ ) इत्युणादिसूत्रोपात्तेनानेन के प्रत्यये चः कत्वे च मर्कः–देवदारुः ।

**२१–२३ जान्ताः मञ्ज सौन्दर्ये च, पञ्ज रोधे, कञ्जँ शब्दे । २४–२६ टान्ताः रण्टँ प्राणहरणे, घट्ट शब्दे, मटँ ह्रासे । २७ ठान्तः कुठँ छेदने २८–३१ डान्ताः—क्रुड शब्दे, उडँ-सङ्घाते, वडँ आग्रहणे, णडणँ भ्रंशे ।**

१. चात् शब्दे, ऋच्छि चटि० ( ३९७ ) इत्युणादिसूत्रोपात्तः, अनेनारे स्त्रिया मञ्जरीति ।

२. अनेनैव सूत्रेणोपात्तः ।

३. अग्यङ्गि० ( ४०५ ) इत्युणादिसूत्रोपात्तादारे प्रत्यये कञ्जारः–कोष्ठजातिः ।

४. कोरुरुण्टिरण्टिभ्यः ( २८ ) इत्युणादिसूत्रोपात्ताद-नेनाके प्रत्यये कुरण्टकः–वृक्षजातिः ।

५. ह्रासः–ह्रस्वत्वम्, कृपॄकटिपटिमटि० ( ५८९ ) इत्यु-णादिसूत्रोपात्तादनेनाहे प्रत्यये मटहः–ह्रस्वभुजाद्यवयवः ।

६. तुषिकुठिभ्यां कित् ( ४०८ ) इत्युणादिसूत्रोपात्ताद-नेन कित्यारे कुठारः ।

७. उडेरुपक् ( ३११ ) इत्युणादिसूत्रोपात्तादनेन कित्युपे उडुपः ।

८. कृशृगॄ० (३२९) इत्युणादिसूत्रादनेनाभे प्रत्यये गौरादि-त्वात् ङ्या–वडभी–वेश्माग्रभूमिका ।

९. नडेर्णित् ( ७१२ ) इत्युणादिसूत्रादनेनणिदी प्रत्यये नाडीः—मुहूर्त्तार्द्धम् ।

३२ णान्ताः—किणंत् शब्दगत्योः ।

३३-३६ तान्ताः—कुतं गुम्फप्रीत्योः, पुंत गतौ, लंत आदाने, सांत सुखे ।

३७ थान्तः—कथ वाक्यप्रबन्धे ।

३८-४१ दान्ताः—उदं आघाते, क्षदं हिंमासंवरणयोः,

---

१ निघृषी० (५११) इत्युणादिसूत्रादनेन किति वे किण्वं—पापम् ।

२ भुजिकुति० (३०५) इत्युणादिसूत्रोपात्तादनेन कित्यपे कुतपः—कम्बलः ।

३ कृतिपुति० (७६) इत्युणादिसूत्रादनेन किति तिके पुत्तिका मधुमक्षिकाः ।

४ (७६) इति सूत्रेण तिके आङ्पूर्वे च आलत्तिका—गानारम्भः ।

५ साहिसाति० (५—१—५९) इति शे मातयः—सुखकारी।

६ कुटिकुलि० (१२३) इत्युणादिसूत्रोपात्तादनेन किद्रिश्चे उदिश्चः—तूर्यवादनोपकरणम् ।

७ हुयामा० (४५१) इत्युणादिसूत्रोपात्तादनेन त्रे प्रत्यये क्षत्रं—राजबीजम् ।

सुन्दे हिंसासौन्दर्ययोः, कंदि वैक्लव्यछेदनयोः ।

४२ धान्तः—मिधृग् मेधाहिंसासंगमेषु ।

४३ नान्तः—धनक् धान्ये ।

४४–४७ पान्ताः—रिप कुत्सायाम्, कपँ कम्पने, क्षुप ह्रासे, दुप संरम्भे ।

४८ बान्तः—बिम्ब दीप्तौ ।

४९–५३ भान्ताः—रिभि स्तुम्भू स्कम्भू स्तम्भे, स्कुम्भू विसारणे च, दर्भ वञ्चने ।

---

१ ऋच्छिचटि० ( ३९७ ) इत्युणादिसूत्रोपात्तादनेनारे प्रत्यये, सुन्दरः—मनोज्ञः ।

२ कदेर्णित् वा ( ३२२ ) इत्युणादिसूत्रोपात्तादनेन णित्यम्बे-कादम्बाः—कलहंसाः ।

३ धान्योपलक्षितायां क्रियायाम्, भृमृ० ( ७१६ ) इत्युणादिसूत्रोपात्तादनेन उः प्रत्यये धनुः ।

४ कटिपटि० ( ४९३ ) इत्युणादिसूत्रोपात्तादनेनौले कपोलः ।

५ ( ३–४–७८ ) इति सूत्रोपात्ताः ।

६ आसुयुव० ( ५–१–२० ) इति कृदन्तसूत्रोपात्तादनेन घ्यणि दाभ्यः—वञ्चनीयः ।

५४–५५ मान्तौ डिमँ[1] हिंसायाम् , धमँ[2] शब्दे ।

५६ यान्तः—पीयँ[3] पाने ।

५७–५९ रान्ताः—उँर[4] गतौ, तुर त्वरणे, तन्द्रिँ[5] साद-मोहयोः ।

६०–६५ लान्ताः—चुल परिवेष्टने, उँल[6] दाहे, लुलँ[7]

---

१ डिमे·कित् ( ३५६ ) इत्युणादिसूत्रोपात्तादनेन किति-डिमे डिण्डिमः–वाद्यविशेषः ।

२ सदिवृत्ति० ( ६८० ) इत्युणादिसूत्रोपात्तादनेनानौ धमनिः–सिरा ।

३ खलिफलि० ( ५६० ) इत्युणादिसूत्रोपात्तादनेनोषे प्रत्यये पीयूषम ।

४ उरेरशक् ( ५३१ ) इत्युणादिसूत्रोपात्तादनेन कित्यशे उरशः–ऋषिविशेषः ।

५ तृस्तृतन्द्रि० ( ७११ ) इत्युणादिसूत्रोपात्तादनेन ईप्रत्यये तन्द्राः–समोहनिद्रा ।

६ उलेः० ( ८२८ ) इत्युणादिसूत्रोपात्तादनेन कित्यक्षौ उलक्षुः–तृणजातिः ।

७ कुलिलुलि० ( ३७२ ) इत्युणादिसूत्रोपात्तादनेन कित्याये लुलायः–महिषः ।

कम्पने, मल्लँ गतौ, हल्ल घूर्णने, भिलण् भेदे ।

६६–६७ वान्तौ धन्वँ तर्वँ गतौ ।

६८–७० शान्ताः—पशी स्पॅशी बाधनग्रथनयोश्च, ऋशर्त् गतिस्तुत्योः ।

७१–७२ षान्तौ भिषँ भये, युँषी सेवने ।

१ ( २७ ) इति सूत्रोपात्तः ।

२ विलिभिलि० ( ३४० ) इत्युणादिसूत्रोपात्तादनेन किन्मे भिल्मं–भास्वरम् ।

३ उक्षितक्षि० ( ९०० ) इत्युणादिसूत्रोपात्तादनेनानि धन्वा–मरुः धनुश्च ।

४ नवेर्वा ( ५५० ) इत्युणादिसूत्रोपात्तादनेन णितीषे ता-विष.—स्वर्गः ।

५ बाधनं–प्रतिघात., चात् गतौ, स्मृदृ० ( ४–१–६५ ) इति सूत्रोपात्तः ।

६ ऋशिजनि० ( ३६१ ) इत्युणादिसूत्रोपात्तादनेन किति ये प्रत्यये ऋश्यः—मृगजातिः ।

७ भिषेः० ( १३१ ) इत्युणादिसूत्रोपात्तादनेनाजे भिष-भिष्णादेशे भिषजो भिष्णजश्च—वैद्यः ।

८ युष्यसि० ( ८९९ ) इत्युणादिसूत्रोपात्तादनेन किति मदि–युष्मद् ।

७३–७५ सान्ताः—लुस[1] हिंसायाम्, पसी[2] गतिबन्धननिवासेषु, मसैक्[3] भर्त्सनदीप्त्योः ।

७६–७७ हान्तौ लुहं हिंसामोहयोः, रिहं हिंसाकत्थनादौ ।

७८–७९ क्षान्तौ चुक्ष शौचे, चुक्षति । चिक्षि विद्योपादाने, चिक्षते ।

इति सौत्रा धातवः—

१ ऋषि वृषि० ( ३३१ ) इत्युणादिसूत्रोपात्तादनेन कित्यभे लुसभः–बालहस्ती ।

२ मृशीपसि० ( ३६० ) इत्युणादिसूत्रोपात्तादनेन तादौ ये पस्त्यं–गृहम् ।

३ ( ४५१ ) सूत्रोपात्तः ।

## चतुर्थं परिशिष्टम्

### लौकिका धातवः ।

८० क्लवि[1] वैक्लव्ये ।

८१ वीजण्[2] व्यजने ।

८२–८५ हीलण् निन्दायाम्, अन्दोलण्[3], हिन्दोलण्, प्रेङ्खोलण्[4] दोलने ।

८६ रुषण्[5] रूक्षणव्याप्योः ।

इति लौकिका

वाक्यकरणीयाः धातवः—

८७ चुलुम्प[6] छेदने, चुलुम्पति ।

---

१ त्यक्त्वेमं सर्वेऽप्येते धातवः अदन्ताः, वैक्लव्यं विच्छायीभवनम्, धातुरयं ' विक्लवन्ते दिवि ग्रहा. '—इति लौकिकप्रयोगानुसारेण सगृहीतः ।

२ 'राजहंसैरवीज्यत'—इति लौकिकप्रयोगानुसारेण सगृहीत·

३ ' सलिलं कंपित धूत वेल्लितान्दोलितेऽपि '—इति हैमप्रयोगानुसारेण सगृहीतः ।

४ दोलनं—उत्क्षेपः, ' प्रेङ्खोलयति मे मनः '—इति लक्ष्यम् ।

५ ' करीव सोन्तर्गिरि रेणू रुषितः '—इति लौकिकप्रयोगानुसारेण सगृहीतः । ६ ' ममासामुन्चुलुम्पती 'ति लक्ष्यम् ।

८८ कूॅच उद्भेदने, कुचति ।

८९ घटण् बन्धने, निर्घाटयति ।

९० उल्लुॅडण् उट्टीकने ।

९१ अवॅधीरण् अवज्ञायाम् ।

९२-९३ उद्धुषत् उल्लकसत् उच्छ्वॅसने ।

इतिवाक्यकरणीयाः—

आगमिका धातवः ।

९४ दट्ट आच्छादने ।

९५-९६ विकुर्व विक्रियायाम्, कुर्व करणे ।

९७ उषर्ण् निवासे ।

९८ युहं उद्धरणे ।

इति आगमिका धातवः

---

१ 'कुञ्चिकायां तु कूचिका'–इति लक्ष्यम् ।

२ 'तावत् स्वरः प्रखरमुल्लुडयांचकार'–इति लक्ष्यम् ।

३ 'तत्र धर्ममवधीरय धीर' इति लक्ष्यम् ।

४ 'उच्छ्वसनं रोमाञ्चः उद्धुषणमुल्लकसन'मित्यपि हैमप्रयोगानुसारेण संगृहीतः ।

५ णिवेत्त्यासश्रन्थघट्टवन्देरन्–५–३–१११ इत्यनेन पर्युपसर्गे च 'पर्युॅषणा'शब्दसिद्धिर्विज्ञेया ।

## पञ्चमं परिशिष्टम्

### वृत्तगणफलम् ।

द्युतादेरद्यतन्यां चाङात्मनेपदमिष्यते ।
वृतादि पञ्चकेऽभ्यो वा स्यमनोरात्मनेपदम् ॥ १ ॥

ज्वलादेर्णो भवेद्वृद्धिर्यजादेः संप्रमारणम् ।
घटादीनां भवेद् ह्रस्वो णौपरेऽजीघटत् मदा ॥ २ ॥

अद्यतन्यां पुषादित्वादङ् परस्मैपदे भवेत् ।
स्वादित्वाच्च क्तयोस्तस्य नकारः प्रकटो भवेत् ॥ ३ ॥

प्वादीनां गदितो ह्रस्वो ल्वादेक्तक्तस्योश्चनो भवेत् ।
युजादयो विकल्पेन ज्ञेयाश्चौरादिके गणे ॥ ४ ॥

मुचादेर्नागमःशे च कुटादीनांमिचिपरे ।
गुणवृद्धेरभावश्च कथितो हैमसूरिणा ॥ ५ ॥

अर्दन्तानां गुणोवृद्धिर्यङन्तादिश्च नो भवेत् ।
संक्षेपेण फलं चैतद्दर्शितं वानरेण हि ॥ ६ ॥

॥ समाप्तम् ॥

१ पुषादेरिति शेषः । २ स्वादेरिति शेष । ३ तुदादेश्श इति प्रत्यये परे—इत्यर्थः । ४ चौरादिकानामिति शेषः । ५ यङ्लुगपि विज्ञेयम् ।

वीर सेवा मन्दिर
पुस्तकालय
काल नं० 232.1 हेमचं
लेखक श्री हेमचन्द्राचार्य।
शीर्षक श्री हेमधातुपाठः।
खण्ड क्रम संख्या 8695